# Shri Ganga sahasram

# શ્રીગઙ્ગાસહસ્રમ્

## Document Information

Text title : Ganga Sahasram

File name : gangAsahasram.itx

Category : devii, puShpAshrIvatsan, nadI, devI

Location : doc_devii

Author : Pushpa Srivatsan

Transliterated by : N V Vathsan nvvathsan at gmail.com

Proofread by : N V Vathsan nvvathsan at gmail.com

Source : Sri Ganga Sahasram

Latest update : August 13, 2023

Send corrections to : Sanskrit@cheerful.com

This text is entirely original composition of Smt. Pushpa Srivatsan, and copyright Smt. Pushpa Srivatsan. All rights reserved by the author. 1) **Under no conditions** can either the whole or any part of this composition be **translated**, **adapted**, or **used for commercial purposes**. 2) Neither the whole nor any part of this composition can be reproduced, recorded, used in public perfomances, or distributed in any other way without **prior written permission** from the copyright holder, the author Smt. Pushpa Srivatsan (contact N V Vathsan nvvathsan@gmail.com).

Please note that proofreading is done using Devanagari version and other language/scripts are converted using **sanscript**.

April 20, 2024

*sanskritdocuments.org*

# શ્રીગઙ્ગાસહસ્રમ્

ૐ

શ્રીઃ

## માગઙ્ગાર્પણમ્

એતત્સ્તોત્રસહસ્રકં સદ્ગુરુસ્વામિશ્રીત્યાગબ્રહ્માનુગ્રહોદ્ભવં
ગઙ્ગાસ્ફુરિતં ગઙ્ગાપુત્રીપુષ્પયા ગઙ્ગામાતરિ સમર્પિતમ્ ।

## શ્રીરામજયમ્

ૐ સદ્ગુરુશ્રીત્યાગરાજસ્વામિને નમો નમઃ ।
નમઃ શ્રીત્યાગરાજાય સ્તોત્રારમ્ભનુતાય ચ ।
સ્તોત્રગીતાદિમૂલાય ગુરુદેવાય તે નમઃ ॥

ૐ

મોક્ષોપાયાય વિદ્મહે । માઙ્ગલ્યાયૈ ચ ધીમહિ ।
તન્નો ગઙ્ગા પ્રચોદયાત્ ॥

# શ્રીગઙ્ગાસહસ્રમ્

## શ્રીગઙ્ગાસ્તોત્રમ્ ૧

### ધ્યાનમ્

મઙ્ગલાનન્દચિદ્રૂપે દેવપેયજલાવરે ।
કલ્યાણિ સુનવાનવ્યે ગઙ્ગામાતર્નમોસ્તુતે ॥

### સ્તોત્રમ્

વિષ્ણુપાદવિનિર્મુક્તા માનવોદ્ધારસાધના ।
નરનારાયણાનૂતા પૂતાપા સુરનિમ્નગા ॥ ૧॥

રજતાદ્રિશિરોભૂષા રજતાભા ઘનસ્વરા ।
રાગપુષ્પાર્ચિતા ગઙ્ગા રાગદ્વેષોપમાર્જના ॥ ૨॥

રાગગોમુખસમ્ભાવા ગઙ્ગોત્તરીસુચારુતા ।
રોગઘ્ની જાહ્નવી ગઙ્ગા ત્વરિતપ્રવહાશુભા ॥ ૩॥

હરિશીલશિલાલાસા કાશીક્ષેત્રમહાયશા ।
હૃષીકેશહરિદ્વારદેવપ્રયાગવૈભવા ॥ ૪॥

સરસ્વત્યલકાનન્દા ધૌલીનન્દાકિનીસુધા ।
પિણ્ડર્મન્દાકિનીનામ્ની સમાયુક્તપયોવહા ॥ ૫॥

ભાગીરથીસમાશ્લિષ્ટા દિવ્યપ્રયાગસઙ્ગમા ।
અવરૂઢાજનોદ્ધારા ગઙ્ગામાતા મમાવની ॥ ૬॥

હિમાનન્દાલકાનન્દા ભાગીરથી શિવંકરી ।
સઙ્ગમાશ્લિષ્ટસત્પાદા ગઙ્ગાનામ્ની સરિદ્વરા ॥ ૭॥

યોગનિષ્ઠાસુસંવર્ધા યોગિનીહૃત્સુનાદગા ।

યોગક્ષેમાવહા ગઙ્ગા યોગયોગસુરાગદા ॥ ૮॥

હિમોદ્ભૂતા હિમાહ્લાદા હિમરાગા હિમાલયા ।
હિમાંશુસ્મેરક્ષીરૌઘા હિમમેઘતડિલ્લતા ॥ ૯॥

હૈમહર્ષસુકીલાલા હિમારામા મનોરમા ।
મમારામા સુધીરામા ચિન્તાવિરામકારણા ॥ ૧૦॥

હિમરાગલયા ગઙ્ગા કવિતોદ્ભાસલાસકા ।
હિમાનન્દપયઃપૂરા મનઃકાયસુપાવકા ॥ ૧૧॥

પાપૌઘધાવના ગઙ્ગા નાદૌઘપરિધાવના ।
ક્લાન્તિસંવાહદિવ્યૌઘા વાગૌઘપરિપૂજિતા ॥ ૧૨॥

સ્નાનાત્માનુભવાનન્દા પાનનામરુચીદદા ।
ધ્યાનલીનપ્રશાન્તિશ્ચ પ્રસાદાચ્છપ્રસાદકા ॥ ૧૩॥

ગાનીયસ્વરસૌન્દર્યા સમુલ્લાસતરઙ્ગભા ।
મૃદુલા પ્રબલા શક્તિરઙ્ઘ્રિંદંશિશુલાલના ॥ ૧૪॥

ઉષઃકૂહાવૃતશ્વેતા દિવાપૂષાવિકસ્ફુરા ।
સાયંસન્ધ્યાસુવર્ણાભા ક્ષપાતારેન્દુવિદ્યુતા ॥ ૧૫॥

ચારુસ્વરાતિલાલિત્યા ચેતોવાક્પરિપાવની ।
નિત્યાનન્દપદાનીતા નિત્યયૌવનભાસુરા ॥ ૧૬॥

રામનામસુમારામા રામકૃષ્ણમહીકૃતા ।
રાગતાલાસ્પદા ગઙ્ગા ઓંકારશ્રુતિસુસ્વરા ॥ ૧૭॥

નાદબ્રહ્મલયા ગઙ્ગા નાદાનન્દાલયાશ્રયા ।
ત્યાગરાજગુરુસ્વામિશિષ્યાપુષ્પાનુતાવરા ॥ ૧૮॥

પ્રકૃત્યદ્ભુતસૌન્દર્યા માગઙ્ગા મમતાહરા ।
ગર્વભઙ્ગસુધીધાત્રી ગઙ્ગામાતા સુમઙ્ગલા ॥ ૧૯॥

મમાહ્લાદે મહાભદ્રે એતત્સ્તોત્રં તવાર્પણમ્ ।
ગઙ્ગામાતર્નમસ્તુભ્યમ્ આગતાહં તવાશ્રયમ્ ॥ ૨૦॥

ગઙ્ગાસ્તોત્રં ગુરોરુક્તં સર્વપાપનિવારણમ્ ।
પઠનં શ્રાવણં ભક્ત્યા ગઙ્ગાસ્નાનફલાવહમ્ ॥

## ૐ શુભમસ્તુ

# શ્રીગઙ્ગાસહસ્રમ્

## શ્રીગઙ્ગાસ્તોત્રમ્ ૨

**શ્રીઃ**

ૐ સદ્ગુરુશ્રીત્યાગરાજસ્વામિને નમો નમઃ ।

### ધ્યાનમ્

અખણ્ડાનન્દસંવાહે દેવકુલ્યે સુદર્શને ।
પ્રસીદ મે નમસ્તુભ્યં ગઙ્ગે મઙ્ગલદાયિનિ ॥

ત્યાગરાજગુરુસ્વામિસત્સ્વરૂપે હિમે શિવે ।
ઇદંસ્તોત્રાવહે દેવિ વાગ્વર્ષવરિવસ્યિતે ॥

### સ્તોત્રમ્

જ્ઞાનવ્યોમોત્પતા ગઙ્ગા નાદાનન્દપ્રવાહિણી ।
અજ્ઞાનાઘહરા દેવી જ્ઞાનમાર્ગસુસાધના ॥ ૧॥

ધ્યાનસ્થાન્તર્વહા ગઙ્ગા ધ્યાયમાનાસમાનગા ।
સઙ્ગીતાનન્દસન્નૂતા સત્સઙ્ગીતરસાયિની ॥ ૨॥

સ્વર્ગાવરૂઢમાહાત્મ્યા તૌષારાચલનિર્ઝરી ।
લોકાતીતાતિશાન્તિશ્ચ અપારાનન્દસાન્ત્વદા ॥ ૩॥

જલરૂપાપરાશક્તિઃ પરંપ્રત્યક્ષદર્શિની ।
સહૃદાનન્દસંવાહા સાનન્દવાક્સ્વરૂપિણી ॥ ૪॥

ગૌરીપતિજટારામા વાગીશ્વરીકૃપાવહા ।
વાગૌઘપ્રાવહા ગઙ્ગા વાગર્ચિતાસુપૂજિતા ॥ ૫॥

કમલાકમલામાભા કમલારિસુશોભકા ।
કમલાપસ્તુતા માતા કમલાસનસન્નુતા ॥ ૬॥

સાંસારધાવના ગઙ્ગા સારસારસુસારકા ।
કંજાતલોચનાપ્લાવા કંસારિખ્યાતમાહિના ॥ ૭॥

હંસસ્સોહઁલ્લયા ગઙ્ગા હંસિની પરહંસિની ।
સચ્ચિદાનન્દસૌભાગ્યા સૌમઙ્ગલસ્વરૂપિણી ॥ ૮॥

હિમવત્પ્રભવા ગઙ્ગા હિમક્રોડસુક્રીડિકા ।
હિમપર્વતશોભાદા શોભમાનનદીવરા ॥ ૯॥

ગમ્ભીરાતિગભીરા ચ મહાવેગા મનોહરા ।
સુજલા શિશિરા પુણ્યા સુજ્ઞાનસુફલાવહા ॥ ૧૦॥

હિમગહ્વરનિર્મુક્તા દર્શનાતિપ્રહર્ષદા ।
હિમપર્યાયપાયૌઘા સ્પર્શનાતિસુકૌશિકી ॥ ૧૧॥

હિમાલયાલયા ગઙ્ગા તરઙ્ગરઙ્ગશોભના ।
હિમાતિશુભ્રપાનીયા લોકોપાધ્યુપમાર્જના ॥ ૧૨॥

કોલાહલોત્પતાનન્દા હિમાતિપ્રિયપુત્રિકા ।
તુહિનાચલવ્યત્યસ્તા કૂલંકષાતિસત્વરા ॥ ૧૩॥

હિમકન્યા હિમાપ્લાવા પ્લાવિકાતિસુખાવહા ।
અમૃતામ્બ્વક્ષયતૃષ્ણા તૃષ્ણાક્ષયજલાવરા ॥ ૧૪॥

પ્રતિષેધનહૈમાપા છાન્દસી પ્રિયકારિણી ।
છિન્નમાનસસંવાહા માનસાનન્દલાસિની ॥ ૧૫॥

સન્માર્ગપથકા ગઙ્ગા સઙ્ગીતાભા લયાવહા ।
સઙ્ગીતાતિસુખામોદા સાન્ત્વસ્વરોપશાન્ત્વિની ॥ ૧૬॥

અહંકારહરા ગઙ્ગા ઇહલોકમુદાદદા ।
પરમાનન્દસૌહર્ષા પરબ્રહ્મસ્વરૂપિણી ॥ ૧૭॥

બ્રહ્મસાક્ષાત્કૃતામોદા બ્રહ્માનન્દાલયાવહા ।
ગઙ્ગામાતા મમામોદા અદ્વૈતાનન્દસિદ્ધિદા ॥ ૧૮॥

અદ્વૈતાનુભવાવાહા અદ્વૈતાનન્દકારિણી ।
અદ્વૈતતોયમાધુર્યા અદ્વૈતતીવ્રવાહિની ॥ ૧૯॥

અદ્વૈતસારસારા ચ અદ્વૈતજ્ઞાનમાર્ગિણી ।
અદ્વૈતાત્મલયાનીયા અદ્વૈતસિદ્ધિસાધના ॥ ૨૦॥

જ્ઞાનાનન્દપયઃપૂરા પૂર્ણાનન્દસુવાહિની ।
અપૂર્ણપૂર્ણકારાપા પૂર્ણાપૂર્ણસુબોધિની ॥ ૨૧॥

મનઃપૂરપયઃપૂરા પૂર્ણત્વવ્યક્તરૂપિણી ।
માઙ્ગલ્યવર્ધિની ગઙ્ગા માઙ્ગલ્યાનન્દગોમુખી ॥ ૨૨॥

વાચામગોચરા ગઙ્ગા વાગ્વિલાસસુલાસિની ।
અદ્ભુતાનન્દસૌન્દર્યા હીરમુત્યવિલાસિની ॥ ૨૩॥

ભર્મચેલાવૃતા ગઙ્ગા વાક્પેત્વપ્રવહાશુભા ।
વિષ્ણુપાદાભિષિક્તોદા ગૌરીકુણ્ડપ્રહર્ષિણી ॥ ૨૪॥

હૈમધારપયોધારા સુરાયુધસુવર્ણભા ।
સપ્તસ્વરાતિમાધુર્યા પ્રણવાહ્લાદનાદિની ॥ ૨૫॥

ઘૂર્ણાપોઘોરગૌરા ચ ચન્દનાસારચન્દના ।
સારચન્દનસંવાહા સલિલાનન્દસારતા ॥ ૨૬॥

ગૌરીકુણ્ડશિલાખણ્ડદિવ્યવિગ્રહતક્ષકા ।
ત્રિવિક્રમબૃહત્પાદહસ્ત્યાનનહસાકૃતિ-
-સંતક્ષિતશિલાખણ્ડા કાભિષિક્તશિવા શિવા ।
નામપુષ્પાર્ચિતા ગઙ્ગા નામાનન્દસ્વરૂપિણી ॥ ૨૭-૨૮॥

સઙ્કુટાસૂર્યપશ્યા ચ સમસાગરવિસ્તૃતા ।
તરઙ્ગોત્તુઙ્ગલાસ્યૌઘા શૃઙ્ગારાનન્દભણ્ડિની ॥ ૨૯॥

દૂરદર્શનસાધૂદા નિકટાતિભયાનકા ।
ભીમા પાલિતભીષ્મા ચ ઇદંપુત્રીસ્તુતિપ્રિયા ॥ ૩૦॥

શોકાપહા શિવા ગઙ્ગા સર્વરોગનિવારિણી ।
મનઃકાયપવિત્રસ્થા પવિત્રાનન્દરૂપિણી ॥ ૩૧॥

મનસ્તાપહરા ગઙ્ગા મનોવાક્પરિપૂજિતા ।
ઇદમ્પુત્રીશિરાવાહા તન્માનસસમિશ્રિતા ॥ ૩૨॥

તદન્તરાત્મસઁલ્લીના આત્માનન્દપ્રદાયિની ।

વ્યક્તાનન્તાત્મશક્તિશ્ચ અવ્યક્તાનન્દરૂપિણી ॥ ૩૩॥

અન્તારાગલયા ગઙ્ગા નાનારાગસુરાગિણી ।
સઙ્ગીતાનન્દસંવાહા સઙ્ગીતાર્ચનસન્નુતા ॥ ૩૪॥

તાપઘ્ની તાપનીયા ચ તાપત્રયનિઘાતિની ।
વર્ષરૂપદૃશ્યમાના વાગ્વર્ષપ્રવહાવરા ॥ ૩૫॥

વાસનાધાવવર્ષા ચ આનન્દામૃતવર્ષિણી ।
અમૃતાવર્ષવાગ્રૂપા વર્ષાનન્દસુવાહિની ॥ ૩૬॥

ત્રિતાપાર્તિહરે દેવિ શુભ્રે ત્રિપથગામિનિ ।
માતર્ગઙ્ગે નમસ્તુભ્યં મદન્તઃપરિવાહિણિ
સત્સઙ્ગે ગીતસાનન્દે ગઙ્ગે સદ્બુદ્ધિદાયિનિ ।
સ્તોત્રમેતત્સુમાઙ્ગલ્યે ત્વત્પાદપરિચારણમ્ ॥ ૩૭-૩૮॥

ત્યાગરાજગુરુસ્વામિસઙ્ગીતામોદસાધના-
-શિષ્યાપુષ્પાકૃતં સ્તોત્રં ગઙ્ગામોદં ગુરુપ્રિયમ્ ।
દ્વ્યષ્ટાદશદલામોદપુષ્પાર્ચનં સુપૂજનમ્ ।
યે ગાયન્તિ નરાસ્તેષાં સર્વાઘનાશનં શુભમ્ ॥ ૩૯-૪૦॥

મઙ્ગલં મઙ્ગલાધાત્ર્યૈ મહાપુણ્યસુવાક્શ્રિયૈ ।
મનઃપાવનનામ્ન્યૈ ચ ગઙ્ગામાત્રે સુમઙ્ગલમ્ ॥

ૐ

શુભમસ્તુ

# શ્રીગઙ્ગાસહસ્રમ્

શ્રીગઙ્ગાસહસ્રમ્

શ્રીઃ

ૐ સદ્ગુરુશ્રીત્યાગરાજસ્વામિને નમો નમઃ ।

## ધ્યાનમ્

ઓંકારરૂપિણિ દેવિ નાદાનન્દલયસ્થિતે ।
ગઙ્ગે પાવિત્ર્યપર્યાયે નમસ્તુભ્યં પ્રસીદ મે ॥

ત્વત્પુત્રીહૃદયાનન્દે સ્મરામિત્વાં દિને દિને ।
તસ્માહમિહસંસારાત્ શીકુરુષ્વ તવસ્પૃશાત્ ॥

માતઃ સ્મરામિ ત્વદ્રૂપં પ્રાતઃ સ્મરામિ ત્વજ્જલમ્ ।
સાયં સ્મરામિ ત્વચ્છાન્તિં સ્વીકુરુષ્વ મદર્પણમ્ ॥

ગઙ્ગા મઙ્ગલસંયુક્તા ઓંકારનાદવાહિની ।
મૂલાધારોત્થનાદૌઘા સહસ્રારસુસઙ્ગમા ॥ ૧॥

ઇડાપિઙ્ગલમધ્યસ્થા સુષુમ્ણાસૂક્ષ્મવાહિની ।
અનાહતોન્નદાનાદા અધ્યાત્મજ્ઞાનદાયિની ॥ ૨॥

કુણ્ડલીશક્તિરૂપા ચ સુનદીસ્થૂલરૂપિણી ।
નાભીહૃત્કણ્ઠજિહ્વોત્થનાદોંકારપ્રવાહિણી ॥ ૩॥

નાદબ્રહ્મલયાનીયા નાદબ્રહ્મમયી સુધી ।
ત્યાગબ્રહ્મગુરુપ્રેષ્ઠપુષ્પાનુતા સુમઙ્ગલા ॥ ૪॥

ગુરુદેવાપરા ગઙ્ગા ગુરુદેવલયાવહા ।
ગુરુદેવપરાવિદ્યા ગુરુવન્દનવન્દિતા ॥ ૫॥

ગુરુવાગમૃતાવાહા ગુરુસઙ્ગીતસંસ્થિતા ।
ગુર્વાશીર્વાદસઙ્ગીતા શિષ્યાપુષ્પાનુતિસ્થિતા ॥ ૬॥

ગુરુપેયૂષવાગ્વર્ષા ગુરુપૂતગુણસ્થિતા ।
ગુરુકૃપાવહા ગઙ્ગા ગુરુકૃપાસુદર્શિતા ॥ ૭॥

ગુરુગીતલસજ્જ્ઞાના ગુરુગાનલયાલયા ।
ગુરુસામોદવાગર્થા ત્યાગરાજકૃતિસ્થિરા ॥ ૮॥

ગુરુસ્મરસહસ્નાતા ગુરુપ્રેરણસંસ્તુતા ।
ગુરુપાદોદકાશીદા ગુરુદર્શનહેતુકા ॥ ૯॥

ત્યાગગઙ્ગાસુલાસ્યા ચ ગુરુગઙ્ગાસુરૂપિણી ।
નાદગઙ્ગા મદાહ્લાદા નાદસૌમઙ્ગલાવહા ॥ ૧૦॥

નાદોંકારગનામ્ની ચ નાદધ્યાનમનઃસ્થિતા ।
નાદોપાસિકહૃન્નાદા નાદપેયૂષનિર્ઝરી ॥ ૧૧॥

નાદાસક્તિસુવાગર્થા નાદવાક્પરિપૂજિતા ।
નાદોપાસનચિત્તસ્થા નાદસુસ્વરપૂજિતા ॥ ૧૨॥

નાદોંકારલયા ગઙ્ગા નાદોપાસનમાર્ગિણી ।
નાદબ્રહ્મનદાકારા નાદરાજ્ઞી નદીવરા ॥ ૧૩॥

નાદપ્રણવનામ્ની ચ નાદોંકારગગાલયા ।
નાદપ્રશાન્તિસંસ્થા મા નાદોંકારસ્વરૂપિણી ॥ ૧૪॥

નાદાન્તઃપ્રશમાવાહા પ્રશાન્તમૃદુલસ્વરા ।
નાદોપાસનસુપ્રીતા નાદમાધુર્યવાસિની ॥ ૧૫॥

નાદાર્થિહૃત્સ્થવાગ્દેવી નાદાર્થિનીમનોવહા ।
લયપ્રશાન્તિસંવાહા ઓંકારલયલાસિની ॥ ૧૬॥

શબ્દોંકારસુસઁલ્લીના શબ્દોંકારાથમઙ્ગલા ।
શબ્દબ્રહ્મશરીરા ચ શબ્દાલીનમનોહરા ॥ ૧૭॥

શબ્દાતિમૃદુમાધુર્યા શબ્દાદિપ્રણવાકૃતિઃ ।
શબ્દાતીતા સુશબ્દા ચ દુઃશબ્દદૈત્યસન્દમા ॥ ૧૮॥

પરુષાસુરશબ્દઘ્ની એકોંકારાતિસુસ્વરા ।
સુસ્વરાભાસસમ્ભાસા સુસ્વરાનન્દદાયિની ॥ ૧૯॥

સાહિત્યાકૃતિસઙ્ગીતા સઙ્ગીતાસક્તિવાગ્લસા ।
કવિતોલ્લાસસઁલ્લાસા સઙ્ગીતકવિતાવહા ॥ ૨૦॥

સહસ્રનામસઙ્ગીતા સઙ્ગીતનામરાગિણી ।
ગઙ્ગાનામસુરાગા મા નામગાનસુમાર્ગિણી ॥ ૨૧॥

દૈવલોકનિપાતા ચ દૈવામૃતકવર્ષિણી ।
ઓંકારશ્રુતિસત્સારા ઓંકારધ્વનિઘાંષિણી ॥ ૨૨॥

ઓંકારદ્રવરૂપા ચ ઓંકારનાદનાદિની ।
ઓંકારપ્રશમા ગઙ્ગા ઓંકારલયવાહિની ॥ ૨૩॥

ઓંકારબિન્દુમધ્યસ્થા ઓંકારનાદરૂપિણી ।
ઓંકારશબ્દમાધુર્યા ઓંકારરાવસાન્ત્વિની ॥ ૨૪॥

ઓંકારાકારશબ્દા ચ નિરાકારૈકરૂપિણી ।
નિરાકૃતસ્પૃહાનીરા નીરવોંકારનાદિની ॥ ૨૫॥

સત્ત્વશ્વેતસ્વરૂપા મા સત્ત્વશબ્દોપશામની ।
સત્ત્વાકાશસુનીલા ચ શુદ્ધસત્ત્વપ્રકાશિની ॥ ૨૬॥

સત્ત્વચિત્તે સદાસ્થા મા સત્ત્વૈતચ્ચિત્તગામિની ।
સત્યવાક્પૂજિતા સત્યા તથ્યોપચારવન્દિતા ॥ ૨૭॥

નામરૂપનદીશ્રેષ્ઠા નામરૂપવિવર્જિતા ।
નામસારા નદીસારા નામગાનાભિપૂજિતા ॥ ૨૮॥

સારસારા મહાસારા જલાસારા સુરાસરા ।
સ્વરસારા સ્વરાસારા સારસત્સારવાહિની ॥ ૨૯॥

સારાસારા સુસત્સારા સારાતિસારસારતા ।
સારાપાતસુવાગ્ધારાસારપ્રસન્નસારતા ॥ ૩૦॥

ગઙ્ગા સુરાપગા દેવી મુક્તિદા પ્રિયદર્શિની ।
અજસ્રધારસંવાહા સહસ્રનામલાસિની ॥ ૩૧॥

સ્વાભાવિકપવિત્રાપા સ્વભાવમાનસાર્ચિતા ।
સ્વભાવાભાવભાવા ચ સ્વભાવભાવભાવિતા ॥ ૩૨॥

ભાવસ્થા સ્તુતિરૂપા ચ ભાવાનન્દપ્રવાહિણી ।

ભાવભાવસુભાવા ચ ભાવાતીતસુમાહિના ॥ ૩૩॥

ભાવનાવા ભવાતીતા ભાવાતીતપ્રહર્ષદા ।
ભાવાભાવા ભવાભાવા ભાવમાનસસમ્ભવા ॥ ૩૪॥

ભવભાવનભાવા ચ ભવશીર્ષપ્રવાહિણી ।
ભવવેગાપહાવેગા ભવરોગનિવારિણી ॥ ૩૫॥

ભવશોકવિનાશા મા ભવતારણમાર્ગિણી ।
ભવભાવપ્રભાવા ચ ભવાભાવસુભાવના ॥ ૩૬॥

ભવપ્રિયા ભવાવાહા ભવપાશવિનાશિની ।
ભવપ્રિયપ્રિયા માતા ભવસન્નુતસન્નુતા ॥ ૩૭॥

ભવાભવા ભવાભાવા ભવભાવપ્રભાવકા ।
ભવસાગરપારા ચ પારાવારપરાવરા ॥ ૩૮॥

ભાવગમ્ભીરસઙ્ગીતા ભાવસ્થા ભાવસંસ્તુતા ।
ભાવસઙ્ગીતસંવાહા ભાવસંસ્તુતિસંસ્થિતા ॥ ૩૯॥

ભાવહૈમાદ્રિસમ્ભાવા ભાવસાગરસઙ્ગમા ।
ભાવપુષ્પાલયા ગઙ્ગા ભાવામોદસુમાર્ચિતા ॥ ૪૦॥

મહાદેવશિરોવાહા મહાદેવી મનસ્વિની ।
મહાયશસ્વિની માતા મહાયશસ્કરી મહી ॥ ૪૧॥

મહાભાગ્યા મહાભોગ્યા મહોન્નતહિમાલયા ।
મહાશ્રેષ્ઠા મહાપ્રેષ્ઠા મહાપર્વતહિમ્યકા ॥ ૪૨॥

મહાગઙ્ગા મહાપુણ્યા મહાલયહિમાલયા ।
મહાવાક્યપ્રવાહા ચ મહાલયા મહાલયા ॥ ૪૩॥

મહાનન્દા મદાનન્દા મહાશોભા શુભોદકા ।
મહાચારુમતી ગઙ્ગા મહામનોગતાસુધા ॥ ૪૪॥

ગઙ્ગા હિમાપગા હિમ્યા કુલહિમ્યાચલાવહા ।
હિમોત્તુઙ્ગનગાવાહા હિમગાઢદરીવહા ॥ ૪૫॥

ગઙ્ગા ભાગીરથી માતા ગોમુખી સત્સુદર્શિની ।
ભગીરથતપઃપૂર્ણા ગિરીશશીર્ષવાહિની ॥ ૪૬॥

ગઙ્ગાનામસમાહ્લાદા નામપાવનવાક્સ્થિતા ।
રાગતાલલયાનન્દા ધ્યાનગોમુખસમ્ભવા ॥ ૪૭॥

નગરાજસુતા ગઙ્ગા નગજાનન્દવર્ધિની ।
અઘનાશપ્રભાવા ચ અગધારિકૃપાવહા ॥ ૪૮॥

સર્વતીર્થમહાતીર્થા સર્વધા સર્વધાવની ।
સર્વમઙ્ગલસમ્પૂર્ણા પૂર્ણત્વહેતુકાવની ॥ ૪૯॥

પ્રાણધાત્રી મદાહર્ષા પ્રાણગઙ્ગા મદમ્બિકા ।
પ્રાણસ્ફૂર્ત્યશ્રુબિન્દુશ્ચ પ્રાણપુષ્પાર્ચિતાભગા ॥ ૫૦॥

પ્રાણદા પ્રાણસઁલ્લીના ગઙ્ગામાતા સુગોમુખી ।
સન્દર્શવિસ્મૃતક્લાન્તિઃ સન્દર્શસ્ફુટવાગ્વહા ॥ ૫૧॥

તૂષ્ણીંસ્થાનોત્થનાદૌઘા તુષારાલયગાલયા ।
તૃષિતાર્થા તૃષાપોહા તોષદામોદકારયા ॥ ૫૨॥

ઘર્ઘરી ઘાંષિણી ગઙ્ગા નુતિહારાતિહારિણી ।
ધ્રુતિશ્વેતા મયાધીતા મન્દહાસવિલાસિની ॥ ૫૩॥

અપારાદ્ભુતસૌન્દર્યા મનોગલનચારુતા ।
અત્યન્તાત્માનુભૂતિશ્ચ અવિસ્મૃતવ્યમઞ્જિમા ॥ ૫૪॥

મનોવિલીયના ગઙ્ગા અપ્રયત્નમનોલયા ।
વિલીનહૈમવાહા ચ વિલીનમાનસાર્ચિતા ॥ ૫૫॥

અભિરોરુદસદ્ધ્યાના ધ્યાનજ્ઞાનફલાવહા ।
બ્રહ્મલીનત્વતત્ત્વા ચ અહંહરા અહઁલ્લયા ॥ ૫૬॥

બ્રહ્મવિદ્યાર્થિસંશ્રાયા બ્રહ્મજિજ્ઞાસુપૂર્ણતા ।
બ્રહ્મજ્ઞાનપ્રસાદા ચ બ્રહ્મત્વતત્ત્વબોધિની ॥ ૫૭॥

બ્રહ્મપ્રત્યક્ષરૂપા ચ બ્રહ્મજ્ઞાનપ્રવર્ધિની ।
બ્રહ્માનન્દપ્રકાશા મા બ્રહ્માનન્દરસાવહા ॥ ૫૮॥

નિર્ગુણબ્રહ્મતત્ત્વા ચ સગુણબ્રહ્મરૂપિણી ।
નાદબ્રહ્મગુરુસ્વામિવ્યક્તરૂપા સુધાજલા ॥ ૫૯॥

વેદોપનિષદાસારા વેદસારસુસારકા ।
ગીતામૃતપરીવાહા ગીતાચાર્યસ્તુતાપરા ॥ ૬૦॥

ઘનાઘઘનસન્ધાવા ઘનગાનસ્મિતા સિતા ।
ઘનનીલઘનાગાના ઘનાઘનઘનસ્વના ॥ ૬૧ ॥

ઓંકારસુસ્વરા ગઙ્ગા નામાતિહર્ષદર્શના ।
સ્વાનુભૂતિપરીવાહા સ્વાનુભૂતપરીવહા ॥ ૬૨ ॥

આનન્દામૃતપાયૌઘા કવિતાભાસકારિણી ।
અઘૌઘાપોહતીર્થૌઘા નિર્દોષા દોષહારિણી ॥ ૬૩ ॥

દ્રવશીલાઘવિદ્રાવા હિમપાષાણખણ્ડિની ।
મૌનધ્યાનમનોલીના માતૃગઙ્ગા મનોમયી ॥ ૬૪ ॥

હિમોત્સઙ્ગોદ્ભવા ગઙ્ગા હિમસંહતિઘાંષિણી ।
હિમમાલા હિમાભાસા હિમાલયગુહાવહા ॥ ૬૫ ॥

જ્યોત્સ્નાભાસજલાદુગ્ધા જ્યોત્સ્નાસ્મેરમનોહરી ।
ત્યક્તસઙ્ગૈકસઙ્ગા ચ અસઙ્ગાસઙ્ગરઙ્ગભા ॥ ૬૬ ॥

મહાસૂક્ષ્માઙ્ગણા ગઙ્ગા સૂક્ષ્માનવાયુવર્ત્મના ।
કેણિકાન્તઃશ્રુતોંકારા હિમનીરવગારવા ॥ ૬૭ ॥

બાલૂકદ્યુતિવિસ્તીર્ણા ચાન્દ્રલોકાષ્ટ્રરાજતા ।
વિરાજરાજરાજાભા તારાગણસ્ફુરત્પ્રભા ॥ ૬૮ ॥

સ્મેરવક્ત્રા તરઙ્ગાભા સિતરશ્મિસ્મિતપ્રભા ।
તૌષારપરિવાહા ચ પાષાણખણ્ડખેલના ॥ ૬૯ ॥

ગોમુખાદ્ભુતસૌન્દર્યા કલ્પનાતીતમુગ્ધતા ।
ગમનાનન્દગાના ચ વ્યોમાતિનીલસ્વચ્છતા ॥ ૭૦ ॥

વિદ્યુત્પ્રભાવિલાસા ચ વિદુસાધુસુવન્દિતા ।
હિમગોત્રાવૃતાવર્તા હૈમહારવિલાસિની ॥ ૭૧ ॥

અજ્ઞાતાદિપ્રભાવા ચ જ્ઞાતાજ્ઞાતાઘઘાતિની ।
અનન્તાનાદિશક્તિશ્ચ અદ્વૈતતત્ત્વબોધિની ॥ ૭૨ ॥

એકબ્રહ્મસ્વરૂપા મા એકોંકારાતિસુસ્વરા ।
એકપૂર્ણૈકસત્યા ચ એકવસ્તુપ્રભાવકા ॥ ૭૩ ॥

એકમાનસસમ્પૂર્ણા એકભક્તિમનોવહા ।

એકશાન્તિહિમદ્રોણિઃ એકાનુભવસારતા ॥ ૭૪॥

એકસત્ત્વૈકતત્ત્વા ચ એકતત્ત્વવિશિષ્ટતા ।
એકૌઘા એકલક્ષણ્યા એકચિત્તસ્તુતિસ્ફુરા ॥ ૭૫॥

એકા એકાકિસુશ્રાયા એકાન્તશાન્તિમાર્ગિણી ।
એકાન્તધ્યાનસમ્પાદા એકાન્તધ્યાનગોચરા ॥ ૭૬॥

એકાન્તાસઙ્ગિનિધ્યાતા એકાન્તધ્યાનવર્ધિની ।
એકાન્તધ્યાતૃસન્નૂતા એકાન્તાનન્દદાયિની ॥ ૭૭॥

એકનિષ્ઠાસમારાધ્યા એકાન્તચિત્તગામિની ।
એકાન્તભાવસઙ્ગીતા એકાન્તિનીવરપ્રદા ॥ ૭૮॥

એકનિષ્ઠાપરાનન્દા એકનિષ્ઠાપ્રવર્ધિની ।
એકાન્તચિત્તરમ્યા ચ એકાન્તસત્સુખાવની ॥ ૭૯॥

એકમાનસસન્તુષ્ટિઃ એકનિષ્ઠાપરાનુતા ।
એકાન્તચિત્તવૈરાગ્યા એકાનુરાગવર્ધિની ॥ ૮૦॥

એકરાગાતિરાગા ચ એકભક્તૈકરાગિણી ।
એકાગ્રચિત્તનિધ્યાતા એકમાનસપૂજિતા ॥ ૮૧॥

પાવિત્ર્યદૃશ્યરૂપા ચ પરિવારણહૈમદા ।
પરાદિવાકસ્વરૂપા મા પરાપરસુવ્યાપિની ॥ ૮૨॥

અખણ્ડધારસંવાહા ચિન્તનાધારરોધકા ।
ચિન્તનાધારધારા ચ ચિન્તનાપારદર્શિની ॥ ૮૩॥

ગોમુખાસારસત્સારા ચારુસારપ્રસારિણી ।
માનસાહ્લાદલાસ્યા ચ પૂર્ણા સન્તતપાવની ॥ ૮૪॥

પ્રાલેયમયપાયૌઘા પ્રાલેયાચલપ્રાઙ્ગણી ।
અતિશીતા ઘનીકર્ત્રી સ્નાનપાનવિમોચની ॥ ૮૫॥

સ્નાનાપૂર્વાનુભૂતિશ્ચ સ્પર્શતૌષારશીતલા ।
શીતાતિશીતવાતા ચ દૃઢચિત્તપરીક્ષણા ॥ ૮૬॥

ઘનીકૃતશરીરા ચ રોમાઞ્ચનાતિહર્ષદા ।
ગોમુખસ્નાનદીક્ષા મા ગુરુરૂપાતિપાવની ॥ ૮૭॥

નામમિશ્રિતસત્સારા પાપસઙ્કુલધાવની ।
જ્ઞાનસન્માર્ગસન્નેત્રી ગાનસંસ્ફૂર્તિપૂરણી ॥ ૮૮॥

નાન્યચિત્તાતિવૈરાગ્યા ન્યૂનતાપોહના શિવા ।
કાવ્યલાલિત્યસંસ્રાવા કાવ્યસન્નુતિદેવતા ॥ ૮૯॥

મનસ્તપોવનસ્થા મા શિવલિઙ્ગસુદર્પણા ।
શિવરામા શિવારામા શિવરામસુનામગા ॥ ૯૦॥

મનોલીનતપસ્તીર્થા મનોભાવનિદર્શિતા ।
મનોનૈર્મલ્યસમ્પ્રાપ્તિર્મનઆકાશનિર્મલા ॥ ૯૧॥

મનઆકાશમાર્ગા ચ મનોનૈર્મલ્યસંસ્તુતા ।
મનોનૈશ્ચલ્યરંહા ચ મનોધારસુગામિની ॥ ૯૨॥

માનસાહ્લાદસન્નામ્ની નામવૈશિષ્ટ્યપાવની ।
માનસાનન્દસમ્પૂર્ણા નામસત્સારધાવની ॥ ૯૩॥

હૈમપર્વતસમ્ભાવા હિમદ્રોણિપ્રસર્પિણી ।
હિમા હૈમા સુદૃશ્યા ચ નેત્રાનન્દવિલાસિની ॥ ૯૪॥

નીરવશ્રુતિસઙ્ગીતા નિત્યનીરવસુસ્વરા ।
નીરવારવમાધુર્યા નીરનીરવસૌખ્યદા ॥ ૯૫॥

ગોમુખાવતરાનૃત્યા તરલાલકરઙ્ગભા ।
શ્વેતલાસ્યોર્મિરીતિશ્ચ ભાસમાનસુનિમ્નગા ॥ ૯૬॥

ભોજ્વાસાશ્વાસના ગઙ્ગા ધ્વનિદર્શનજીવના ।
ભોજજઙ્ગલનિમ્નસ્થા કલસ્વાગતસુસ્વરા ॥ ૯૭॥

મૃદુશબ્દકલાસ્વાગતાનન્દપક્ષિગીતિકા-
-માધુર્યોપચયાદ્રિપ્રશાન્તિમધ્યૈકઝર્ઝરા ॥ ૯૮॥

ચીઙ્વાસવનસઁલ્લાસા સાયઙ્કાન્તિપ્રસાન્ત્વિની ।
યાત્રામધ્યૈકરાત્રીવિરામવિશ્રામનાદિની ॥ ૯૯॥

ગોમુખીહૈમસંવાહા ગઙ્ગોત્તરીસુપૂજિતા ।
ભગીરથતપસ્તીર્થા ભાગીરથી સ્વરાપગા ॥ ૧૦૦॥

ગઙ્ગોત્તરીતપસ્તીર્થા ભગીરથતપસ્સ્થલા ।
નિત્યપૂજાર્ચિતાગીતા પુરાણાલયવૈભવા ॥ ૧૦૧॥

મનસ્તપોગુહાવાહા તીર્થીકૃતમનસ્સ્થલા ।
મનઃક્ષેત્રાવહા ગઙ્ગા મનઆલયપૂજિતા ॥ ૧૦૨॥

સન્ધ્યારતિસુદીપાભા સન્ધ્યારાગસુરાજદા ।
વન્યા ધન્યા મનોરમ્યા પિઙ્ગલાતારહેમદા ॥ ૧૦૩॥

વ્યોમમાપનશૈલસ્થા શૈલોત્તુઙ્ગોપરક્ષણા ।
ગાઢપ્રશાન્તિસઙ્ગીતા ગાઢકન્દરગર્જના ॥ ૧૦૪॥

હિમોપાન્તપ્રવાહા મા બહુપાષાણખણ્ડિની ।
ભગીરથશિલાઙ્કા ચ ગઙ્ગાકેદારસઙ્ગમા ॥ ૧૦૫॥

શિલોચ્ચયાવહા ગઙ્ગા શિલાપારાતિઘૂર્ણિકા ।
શિલારૂપાર્ચિતા માતા શિલાશ્લક્ષ્ણપરીવહા ॥ ૧૦૬॥

કીકસાશીતકીલાલા અવિસ્મૃતવ્યમજ્જના ।
નવસઙ્ખ્યાવગાહા ચ ક્ષણમાત્રૈકમજ્જના ॥ ૧૦૭॥

મગ્નમાત્રનવાજીવા નવ્યપ્રશાન્તિદાયિની ।
ક્ષુદ્રક્લાન્તમનઃપેત્વા પ્રાણસંસ્ફૂર્તિહેતુકા ॥ ૧૦૮॥

હિમાનિલાસુખપ્રાતિકૂલ્યેષદુષ્ણભાસ્કર-
-દ્યુતિસ્નાતાસ્તુતાગીતા ગઙ્ગાસ્નાનાતિહર્ષદા ॥ ૧૦૯॥

બૃહચ્છિલાસનધ્યાતા ક્ષણસ્ફૂર્તિસ્તુતાનુતા ।
બૃહચ્છવિવશીકર્ત્રી મહન્નીલકહિમ્યદા ॥ ૧૧૦॥

શ્રેષ્ઠોત્કૃષ્ટહિમાપ્લાવા શ્રૈષ્ઠ્યદૈવત્યદાયિની ।
શ્વેતાચલપ્રભાવા ચ શ્વેતા શ્વેતોર્મિવસ્ત્રભા ॥ ૧૧૧॥

રજસ્તમોમલાપોહા શુદ્ધસત્ત્વા સુરાજતા ।
રજતાદ્રિસુબિમ્બા ચ શુદ્ધશુક્લાભભાસુરા ॥ ૧૧૨॥

સીમન્તહૈમરેખાભા સીમારહિતસૌભગા ।
અગશ્રેષ્ઠસરિચ્છ્રેષ્ઠા અઘઘ્ની વસુદાયિની ॥ ૧૧૩॥

રજતાદ્રિસુપુત્રી ચ રજતાચલરાગિણી ।
મનોવેગાપહાવેગા રાગમાનસરાગિણી ॥ ૧૧૪॥

અતિકોલાહલા ગઙ્ગા આદિકાલાભિપૂજિતા ।

અત્યૂષરમણીયા ચ સાયંસન્ધ્યાસુરાગિણી ॥ ૧૧૫॥

રાજશેખરસુપ્રીતા રાજશેખરશેખરી ।
રાજરાજવિરાજાભા રાજપ્રવાહભાસુરા ॥ ૧૧૬॥

વર્ણનાતીતસૌન્દર્યા પ્રાચીરપ્રાંશુહૈમદા ।
મતિતારાગણાભા ચ અલૌકિકાદ્ભુતાલયા ॥ ૧૧૭॥

મનોગતાતિનીલાબ્ભ્રા મનઃસ્થિતાતિમઞ્જિમા ।
મનોવશીકરા ગઙ્ગા મઞ્જુલા મઞ્જુગામિની ॥ ૧૧૮॥

મનોગુપ્તમહાર્થા ચ વ્યક્તરૂપપ્રવાહિણી ।
પૂર્ણપ્રકૃતિસૌન્દર્યા પૂતકા પૂતમણ્ડલા ॥ ૧૧૯॥

મનઃપૂર્ણા સદાપૂર્ણા પૂર્ણપૂર્ણાતિશાયિની ।
તપઃપૂર્ણા સુધાપૂર્ણા તૂર્ણઘૂર્ણાતિહારિણી ॥ ૧૨૦॥

ગઙ્ગોત્તરી સુકૌમારી ગૌરીકુણ્ડઝરીસરી ।
ગૌરીકુણ્ડમહોલ્લાસા શતરાગાતિરાગિણી ॥ ૧૨૧॥

ગૌરીકુણ્ડશિલોત્પાતનર્તનાહ્લાદવર્ધિની ।
બૃહત્પૃથુઝરાસારા ઝઙ્કારનાદઝર્ઝરી ॥ ૧૨૨॥

ચિન્તનાદૂરદૂર્ણિશ્ચ ચિન્તિતામાનસાર્ચિતા ।
મનસ્સ્તમ્ભનઘૂર્ણિશ્ચ ઘૂર્ણમાનસસાન્ત્વિની ॥ ૧૨૩॥

ચારુસારજલાસારા ચારુગીતાતિસુસ્વરા ।
ચારુકલ્લોલલાસ્યા ચ ચારુરાગનુતિસ્થિરા ॥ ૧૨૪॥

ધારાનિપાતવાગ્ધારા વાગ્ધારવસુવર્ષિણી ।
ધારાપાતસુસદ્ધારા ધારામૃતસુવાહિની ॥ ૧૨૫॥

શૈલજા શૈલસૌન્દર્યા શૈલસંશીતવાહિની ।
શૈલધારા પ્લવોત્પાતા શૈલસત્સારવાહિની ॥ ૧૨૬॥

પ્રાણદાહ્લાદનીરા ચ પ્રાણસંસ્ફૂર્તિવાસિની ।
સ્વરોંકારપ્રશાન્તિશ્ચ હિમ્યપ્રશાન્તિવર્ધિની ॥ ૧૨૭॥

ગૌરીકુણ્ડનગોત્સઙ્ગદર્શિતા બહુકીર્તિતા ।
સ્ફૂર્તિબીજાતિસૌન્દર્યા સ્ફુટશ્લોકાભિવન્દિતા ॥ ૧૨૮॥

ચિત્તપૂર્ણાભિરૂપા ચ શ્રોત્રપૂરણસુધ્વનિઃ ।
નાદોંકારઘનાગાના મનોલીનઘનસ્વના ॥ ૧૨૯ ॥

ગૌરી ગૈરી ગરિષ્ઠા મા ગૈરિકદ્યુતિશોભના ।
ગૌરીનાથાભિષેક્ત્રી ચ ગૌરીકુણ્ડપ્રભાસિની ॥ ૧૩૦ ॥

હૈમાભા હૈમસમ્પન્ના હૈમાચલોદ્ભવા હિમા ।
હૈમકૌસુમ્ભપિઞ્જારખર્જૂરનિર્ઝરીઝરી ॥ ૧૩૧ ॥

ગઙ્ગા કનકશૃઙ્ગાભા કનકામ્બરધારિણી ।
હીરવત્સ્ફુરનીરાભા હૈમાલયહિરણ્મયી ॥ ૧૩૨ ॥

અરુણોદયપિઞ્જારા કૌસુમ્ભધરબિમ્બિતા ।
તરુણારુણસૌવર્ણા સૌવર્ણાર્ચિતભાસુરા ॥ ૧૩૩ ॥

ઓંકારાવર્તઝાગઙ્ગા ઓંકારરવઝર્ઝરા ।
ઓંકારશબ્દસત્સારા ઓંકારલિપિલેખકા ॥ ૧૩૪ ॥

શિવા શિવશિરોવાહા શિવંકરી શિવપ્રિયા ।
શિવરામનુતારામા શિવરામસુનામગા ॥ ૧૩૫ ॥

વનમાલા વનારમ્યા મનોહિમવનારમા ।
હિમાલયવનારામા અભિરામા હિમારમા ॥ ૧૩૬ ॥

ભૂરિપ્રચુરતીર્થૌઘા ભૂરિસન્તોષકારિણી ।
ભૂયિષ્ઠસ્તોત્રવિખ્યાતા ભૂરિતૈજસભામિની ॥ ૧૩૭ ॥

મહાનીલમહીજીવા મહાન્યાસપ્રબોધિની ।
મહાશક્તિપરીવાહા મહોન્નતાસુમાનસા ॥ ૧૩૮ ॥

મહાધરપ્રવાહા ચ મહાર્ણવપ્રયાણિની ।
મહાધરીપ્રભાવા મા મહાજ્ઞાનપ્રદાયિની ॥ ૧૩૯ ॥

શ્વેતાચલમહાસાલા નીલાકાશચ્છદિચ્છવિઃ ।
લુઠિતોપલજાલા ચ દેવદારુવનેચરી ॥ ૧૪૦ ॥

દિવ્યનવ્યસમીરા ચ દિવ્યૌષધ્યસુસારકા ।
દિવ્યક્ષેત્રપ્રભાવા મા દિવ્યસૌગન્ધ્યહિમ્યકા ॥ ૧૪૧ ॥

હિમજા હિમજાહ્લાદા હિમજાશીતવર્ણસિઃ ।
હિમપ્રશાન્તિસઙ્ગીતા હિમગોત્રપ્રવાહિણી ॥ ૧૪૨ ॥

ચિન્તનાતિવ્યથાશામ્યા ચિન્તનાપૂરપાવની ।
ચિત્રવૈચિત્ર્યસઞ્ચારા વૈચિત્ર્યચારુગોત્રિણી ॥ ૧૪૩ ॥

દેવદારુવનોત્સઙ્ગા નવ્યમિષ્ટસમીરણા ।
ક્ષેત્રગઙ્ગોત્તરીરમ્યા પાણ્ડવાઙ્ગનચત્વરા ॥ ૧૪૪ ॥

તપોરન્ધ્રમુખસ્રાવા રુદ્રગઙ્ગાસમાગતા ।
શૈલસારજલાસારા જાહ્નવી કુલશૈલિની ॥ ૧૪૫ ॥

કૈરવીરાગલાસ્યા ચ કૈરવદ્યુતિશોભના ।
ભૈરવીરાગલાસસ્થા ભૈરવારામકામિની ॥ ૧૪૬ ॥

ભૈરવી કાલવેગા ચ ભૈરવીનાથશીર્ષગા ।
ભૈષજ્યપૂતતીર્થા ચ બહુમાન્યસુતીર્થકા ॥ ૧૪૭ ॥

ગઙ્ગાભાગીરથીયુક્તા જાહ્નવી નગમધ્યગા ।
દ્વિકરૈકપથાનેત્રી બહુરમ્યદરીવહા ॥ ૧૪૮ ॥

નીરવાઢ્યનગોત્સઙ્ગા દેવદારુવનારમા ।
ઉપાન્તાવિસ્મૃતવ્યા ચ ભાવિતૈકાનુભૂતિમા ॥ ૧૪૯ ॥

પારસઞ્ચારસામોદા શ્વાસભગ્નાતિનીરવા ।
અન્તઃશ્વાસાનુભૂતા ચ શ્રોત્રનેત્રોત્સવારવા ॥ ૧૫૦ ॥

પીતનીરવપેત્વા ચ પર્યાપ્તાયતલાઘવા ।
શમનસ્વરસંવૃદ્ધગાઢપ્રશાન્તિગાલયા ॥ ૧૫૧ ॥

યાત્રાપ્રવૃત્તિસારમ્યા યાત્રિણીસહચારિણી ।
શૈલોત્તુઙ્ગાવૃતા ગઙ્ગા શીલિની હરિશીલિની ॥ ૧૫૨ ॥

બહુરૂપા બૃહદ્ભાસા બહુરાગાતિમોહિની ।
અવિસ્તીર્ણાતિવિસ્તીર્ણા બહુરઙ્ગસુહાસિની ॥ ૧૫૩ ॥

મોહના મોહનાકારા મોહનાલાસ્યગામિની ।
મોહદારસુસન્મોહા મોહદારિઘૃણાકરી ॥ ૧૫૪ ॥

મોહિતામાનસાવાહા મોહાપોહા મુદાવહા ।
અમોહમોહમોહા ચ અમોહમોહમોહિતા ॥ ૧૫૫ ॥

મોહસંવાહસંવાહા સંવાહરમ્યમોહિની ।

મોહનાનન્દરાગા ચ રાગમોહાસુરાગિણી ॥ ૧૫૬ ॥

મોહનાધારધારા ચ ધારણાયોગસાધના ।
યોગાધારપયોધારા ધારાપાતાતિઝલ્લરા ॥ ૧૫૭ ॥

હરિતારણ્યશુક્લા ચ હરિતા હર્યતિપ્રિયા ।
કુલશૈલશિલાધારા શિલાખણ્ડસુશિલ્પકા ॥ ૧૫૮ ॥

દેવદારુઘનારણ્યા હિમશૃઙ્ગપરીવૃતા ।
નાનાપ્રસ્તરરઙ્ગા ચ રૂપલક્ષણવિસ્મયા ॥ ૧૫૯ ॥

બહુવર્પવહા ગઙ્ગા દરીપૃથુપરીવહા ।
બહુરઙ્ગસુલાસ્યા ચ બૃહચ્છવિલસત્પ્રભા ॥ ૧૬૦ ॥

ચિત્રવૈચિત્ર્યપાષાણા શિલાખણ્ડાભિમણ્ડિતા ।
ચારુપ્રસ્તરપ્રાચુર્યા રાગરૂપવિલક્ષણા ॥ ૧૬૧ ॥

દેવદારુવનામોદા દેવભૂમિપ્રસન્નતા ।
પાષાણહરિકેદારલિઙ્ગસેચનપાવની ॥ ૧૬૨ ॥

સન્ધ્યાવેલપ્રશાન્તિશ્ચ પક્ષિસુસ્વરચારુગા ।
ધ્યાનવર્ધનરમ્યાષ્ટ્રા લક્ષ્મીનારાયણાર્ચના ॥ ૧૬૩ ॥

આરણ્યદ્રોણિમધ્યસ્થા પક્ષિજાલરવારવા ।
ચારુપક્ષિવિહારા ચ ચારુસારસુખસ્વરા ॥ ૧૬૪ ॥

ધરસ્મેરસુલાવણ્યા કૌમારી કૌશલપ્રદા ।
પરા દેવી સુજલ્પા મા કલ્યાણી નિત્યમઙ્ગલા ॥ ૧૬૫ ॥

વિસ્વરાર્તિવ્યથાશ્રાયા સુસ્વરપ્રશમાવહા ।
વિશ્રાન્તિસૌખ્યસમ્મૂલા મૂલસ્થાનાતિદેવતા ॥ ૧૬૬ ॥

સપ્તતાલનગોત્સઙ્ગદૃષ્ટિપ્રસાદમોદિની ।
મહાસૂક્ષ્માબહુગ્રાવનાનારૂપપ્રસર્પિણી ॥ ૧૬૭ ॥

સૌમ્યકાશીતપોભૂમિરમ્યાનન્દાભિવર્ધિની ।
સૌમ્યા સૌમાનસારાધ્યા ધ્યાનનામનમસ્કૃતા ॥ ૧૬૮ ॥

કાશ્યુત્તરસુશોભા ચ શૈલમધ્યપ્રકાશિની ।
વિશ્વેશ્વરાભિષેકા ચ વિશ્વગા વિશ્વમોદિની ॥ ૧૬૯ ॥

હિમાદ્રિવલયા ગઙ્ગા શૈલમાલાસુભૂષણા ।
તાપસાવરદાત્રી ચ તાપસારણ્યશૈલભૂઃ ॥ ૧૭૦॥

પઞ્ચમીતિથિસઙ્ગીતગુરુકીર્તનલાસિની ।
દિવ્યનામકૃતિસ્થા મા દિવ્યાનુભૂતિપૂરણી ॥ ૧૭૧॥

ગઙ્ગા પઞ્ચાનનપ્રીતા પઞ્ચાનનજટાસ્રવા ।
પઞ્ચાનનસુવક્ત્રાદિસપ્તસ્વરરસાસરા ॥ ૧૭૨॥

સત્યજ્ઞાનમયી દેવી વશઙ્કરી સુશઙ્કરી ।
વિશ્વેશ્વરપ્રિયા માતા વિશ્વેશ્વરી વિમોચની ॥ ૧૭૩॥

ઈશ્વરાનુગ્રહાવાહા ઈશ્વરાનુગ્રહાવહા ।
ઈશ્વરાશીકરસ્પર્શા ઈશ્વરી ઈશ્વરપ્રિયા ॥ ૧૭૪॥

ઈશ્વરપ્રિયસઙ્ગીતા ઈશ્વરાનન્દસસ્મિતા ।
ઈશ્વરાભાસસાભાસા ઈશ્વરારક્ષણાવહા ॥ ૧૭૫॥

બિલઙ્ગનાસ્વયુક્તા ચ કુલપર્વતસર્પિણી ।
સ્વાશ્લિષ્ટાલકનન્દા ચ સ્વસૃસામોદસઙ્ગમા ॥ ૧૭૬॥

અવિસ્મૃતાતિસંશીતા અરોધા રોધભઞ્જિકા ।
અભિસ્મૃતાભિવન્દ્યા મા શુભદેવપ્રયાગગા ॥ ૧૭૭॥

અપર્યાપ્તાનુભૂતિશ્ચ સુપર્યાપ્તસુમઙ્ગલા ।
અનાદ્યન્તા અભોક્ત્ર્યાહ્વા અશોષા શોષહાશુગા ॥ ૧૭૮॥

તાપનાતઙ્કહાશીતા વિષ્ણુગઙ્ગા વિયત્સરિત્ ।
શિવગઙ્ગા શિવા શુભ્રા શિલાઘનઘનોલ્લસા ॥ ૧૭૯॥

રઘુનાયકપાદાઙ્કા રઘુનાયકગાયકા ।
દેવપ્રયાગદિવ્યાભા દિવ્યક્ષેત્રપ્રયાગભા ॥ ૧૮૦॥

ભાગીરથ્યલકાનન્દાસઙ્ગમાનન્દગઙ્ગિકા ।
દેવપ્રયાગતીર્થૌઘા સર્વમઙ્ગલદાયિકા ॥ ૧૮૧॥

ગઙ્ગોત્તરીહિમોદ્ભાવા ભાગીરથીસુગોમુખી ।
અલકાપુરિનન્દા ચ સતોપાન્તહિમોદ્ભવા ॥ ૧૮૨॥

સ્વર્ગારોહણમાર્ગા ચ અલકાપુરિસંહતા ।
સ્વર્ગાવરોહસૌન્દર્યા શુભાઙ્કા શુભલક્ષણા ॥ ૧૮૩॥

શુભ્રચન્દ્રદ્યુતિશ્વેતા શુભાકારા શુભાકરા ।
સૌમેરુપર્વતોત્તીર્ણા સૌમેરુકલસદ્રસા ॥ ૧૮૪॥

કુબેરપટ્ટણાનન્દા ધારાપાતસુનૃત્યભા ।
કુબેરપટ્ટણોદ્ઘોષા સ્વર્ગાપગા સુરા સુભા ॥ ૧૮૫॥

કુભૃત્કુમારિકા ગઙ્ગા કલકલ્લોલશબ્દિની ।
અલકાપુરિસઙ્ગીતા કલગાનસુનર્તિની ॥ ૧૮૬॥

પુલકંદાલકાનન્દા હૈમસંહતિસંવહા ।
પૂરિતાનન્દસારા ચ અલૌકિકાદ્ભુતદ્યુતિઃ ॥ ૧૮૭॥

દિવ્યનન્દા સુવાઙ્નન્દા વાગર્થનૃત્યલાસિની ।
ભૂરિશોભાલકાનન્દા ભૂતભવ્યભવચ્છવિઃ ॥ ૧૮૮॥

ભૂરિધારા બૃહદ્ધારા વસુધારા સુવાગ્રસા ।
વ્યોમદધ્રાચલાવાહા ચારુહાસા શશાઙ્કુભા ॥ ૧૮૯॥

વસુધારા સુવાગ્ધારા વાગ્વેગવેગવાહિની ।
અવાચ્યાદ્ભુતધારા ચ વાગ્વર્ણવર્ણલાસિની ॥ ૧૯૦॥

કવિસ્ફૂર્તિસુસંભાસા કવિતામઞ્જુઘોષિણી ।
અતિરમ્યાલકાનન્દા અવાચ્યાનન્દકારિણી ॥ ૧૯૧॥

દેવભૂતિઃ સુધાધૌતી દિવ્યકાઝર્ઝરાવતી ।
દેવભૂમિમુદાવાહા દિવ્યાષ્ટ્રપ્રાવણાવહા ॥ ૧૯૨॥

તપોલયસુદિવ્યાષ્ટ્રા લયપ્રશમમાનસા ।
મત્તલોકાતિદૂરા ચ મચ્ચિત્તભક્તિલાલસા ॥ ૧૯૩॥

ધ્યાનતત્પરસંયુક્તા ધ્યાનવર્ધનમણ્ડલા ।
તાપસાશ્રયશાન્તિશ્ચ સાધુયોગિતપસ્સ્થલા ॥ ૧૯૪॥

નિત્યનિશ્ચલશાન્તિશ્ચ તપોયુક્તસમાશ્રયા ।
નિત્યનીરવસુસ્રાવા નિત્યપ્રણવનાદિની ॥ ૧૯૫॥

તૂષ્ણીંસ્થાનાતિસાન્ત્વા ચ નીરવપ્રણવારવા ।
તુહિનાલયસન્નાદા તૂષ્ણીંસ્થાનોત્થગારવા ॥ ૧૯૬॥

તૌષારમધ્યરાજોદા રજતાદ્ગ્યવરોહિણી ।

ધૌતજામ્બૂનદાભા ચ રજતાદ્યતિશોભના ॥ ૧૯૭॥

શુભશીઘ્રગપાનીયા અક્ષોભાક્ષુબ્ધઘૂર્ણિકા ।
શુભશીઘ્રસુગાનીયા શુભા શુભ્રા શુભપ્રદા ॥ ૧૯૮॥

શતકુમ્ભદસંવૃત્તા શતરાગવરાનના ।
ચારુકલ્લોલકાનન્દા નન્દાયુક્તસરસ્વતી ॥ ૧૯૯॥

સરસ્વતી સુવાણીદા ભીમપ્રવાહભીષણા ।
ભીષ્મમાતા મદમ્બા ચ પ્રયાગકેશવસ્તુતા ॥ ૨૦૦॥

વેદવ્યાસગુહાદૃશ્યા ગણેશ્વરગુહેક્ષિતા ।
વ્યાસાચાર્યસુનિધ્યાતા મહાભારતસાક્ષિણી ॥ ૨૦૧॥

શ્રીકૃષ્ણકીર્તિતાનન્દા શિષ્યોદ્ધવતપસ્સ્થલા ।
બદરીકાશ્રમાવાહા બદરીવનમોહિની ॥ ૨૦૨॥

નરનારાયણોત્સઙ્ગા નરનારાયણસ્તુતા ।
બદરીધામતીર્થૌઘા બદરીનાથમજ્જના ॥ ૨૦૩॥

બદરીધામસાલાસ્યા બદરીકાશ્રમાલયા ।
તપોભૂમ્યાત્મજા ગઙ્ગા ભૂમિજારમણાલયા ॥ ૨૦૪॥

અતિશોભાલકાનન્દા અતિવેગાતિહિમ્યકા ।
પર્યાપ્તસ્વાનુભૂતિશ્ચ અપર્યાપ્તાત્મધીતિકા ॥ ૨૦૫॥

ચણ્ડવેગાતિસન્દિગ્ધા અગાધાતિભયાનકા ।
હૈમોદકાલકાનન્દા જડીકૃતજડસ્પૃશા ॥ ૨૦૬॥

શીઘ્રાતિશીઘ્રમગ્ના ચ શીઘ્રાતિશીઘ્રધાવની ।
નીરપારસુનિધ્યાતા ધ્યાનમાનસપૂજિતા ॥ ૨૦૭॥

પ્રતિયાત્રાસુમગ્ના ચ સાયંસંશીતમજ્જના ।
અતિપુણ્યાતિધન્યા ચ વિલક્ષણસુલક્ષણા ॥ ૨૦૮॥

પ્રશાન્તબદરીક્ષેત્રા નરનારાયણાશ્રમા ।
તપોલયાવહાવાહા તપોમાનસસન્નુતા ॥ ૨૦૯॥

લક્ષ્મણાગ્રજસમ્પૂજા ગઙ્ગા લક્ષણલક્ષ્મણા ।
લક્ષ્મણગઙ્ગાલકાનન્દા સઙ્ગમારામવીક્ષણા ॥ ૨૧૦॥

પુષ્પોત્સઙ્ગપ્રવાહા ચ હૈમકુણ્ડાતિભાસુરા ।
ઉત્તુઙ્ગશૃઙ્ગબિમ્બા ચ હૈમાદ્રિરુચિબિમ્બભા ॥ ૨૧૧ ॥

વિષ્ણુપાદોદકા ગઙ્ગા વિષ્ણુપ્રિયા વિશિષ્ટભા ।
ધવલાધૌલિગઙ્ગા ચ વિષ્ણુપાદાભિષેચના ॥ ૨૧૨ ॥

ધૌલીગઙ્ગાલકાનન્દા વિષ્ણુપ્રયાગસઙ્ગમા ।
નગમધ્યાતિમુગ્ધા ચ વિષ્ણુનામનિનાદિની ॥ ૨૧૩ ॥

સાયંસન્ધ્યાસુનિધ્યાતા સઙ્ગમાતીતકાન્તિભા ।
પ્રવાહદારુણાસ્નાતા એકાવિસ્મૃતિરઞ્જના ॥ ૨૧૪ ॥

જ્યોતિર્મયા તપઃપૂર્ણા જ્યોત્સ્નાભાસસુલાસિની ।
ગાઢકન્દરસંવાહા જ્યોતિર્મઠવિલાસિની ॥ ૨૧૫ ॥

લક્ષ્મીનૃસિંહસમ્પ્રીતા પ્રીતિસ્નિગ્ધસુધારસા ।
પ્રીતિસ્નિગ્ધાતિમાધુર્યવાણીદૈવિકગાયિની ॥ ૨૧૬ ॥

નન્દનન્દનનન્દા ચ નન્દાકિનીસુસઙ્ગમા ।
નન્દપ્રયાગરમ્યાષ્ટ્રા કુલાચલસુનિમ્નગા ॥ ૨૧૭ ॥

નન્દાકિની અચણ્ડાભા નન્દાપ્રચણ્ડભાસુરા ।
નલિની નલિનાક્ષી ચ નલિનાક્ષસુનામગા ॥ ૨૧૮ ॥

આસ્નાતસઙ્ગમાનન્દા દૃપદાસ્તારપૂરિતા ।
વિસ્તીર્ણનિમ્નભૂરમ્યા હરિતાગપરીવૃતા ॥ ૨૧૯ ॥

કર્ણપ્રયાગગા ગઙ્ગા પિણ્ડર્ગઙ્ગાસયુક્તભા ।
પિણ્ડર્ગઙ્ગાલકાનન્દા કર્ણપ્રયાગસઙ્ગમા ॥ ૨૨૦ ॥

સલિલાશીતસુસ્પર્શા સવિકલ્પવિગાહિતા ।
સ્નાનાતિહર્ષદા ગઙ્ગા અવિકલ્પાવગાહિતા ॥ ૨૨૧ ॥

શૈત્યસૌખ્યપ્રદા ગઙ્ગા યાત્રાસન્તાપહારિણી ।
શૈથિલ્યપ્રતિહર્ત્રી ચ મનસ્કાયસુજીવની ॥ ૨૨૨ ॥

હરિદાસવિમોક્ત્રી ચ હરિસઙ્કીર્તનપ્રિયા ।
ગિરિગૂઢાતિગાઢા ચ ગિરિશ્રેષ્ઠતપસ્સ્થલા ॥ ૨૨૩ ॥

ગિરિપ્રાવણ્યલાવણ્યા ગિરિણિદ્ધા ગિરાણદા ।
ગિરિગહ્વરસન્દૃશ્યા ગિરિકુલ્યા ગિરિપ્રિયા ॥ ૨૨૪ ॥

રુદ્રાણી રુદ્રસમ્પ્રીતા રુદ્રપ્રયાગભાસુરા ।
મન્દાકિન્ચલકાનન્દા સઙ્ગમોલ્લાસખેલના ॥ ૨૨૫॥

મન્દાકિની સુકેદારી મન્દહાસમૃદુપ્રભા ।
નન્દાલકાપુરીજાતા ધ્રુતિશ્વેતાતિચણ્ડભા ॥ ૨૨૬॥

મન્દાકિન્યતિવૈચિત્ર્યા ચિત્રરૂપા સુગામિની ।
ફેનધ્રુત્યલકાનન્દા પાષાણખણ્ડગર્જના ॥ ૨૨૭॥

સિતપ્રભાલકાનન્દા મન્દાકિની હરીન્દ્રભા ।
વિષ્ણુગઙ્ગા સુરાલાસ્યા શિવગઙ્ગાસુસઙ્ગમા ॥ ૨૨૮॥

અસઙ્ગતાનુભૂતિશ્ચ સઙ્ગમાહર્ષમજ્જના ।
બહુશક્તિગ્રહાવેગા સન્દિગ્ધસન્નિમજ્જના ॥ ૨૨૯॥

બૃહત્પ્રમાણતીર્થૌઘા તૂર્ણિઘૂર્ણિભયાનકા ।
શીતોદકાતિશીઘ્રા ચ શીઘ્રાતિશીઘ્રગાહિતા ॥ ૨૩૦॥

અષ્ટોત્તરશતામગ્ના અષ્ટોત્તરશતાર્ચિતા ।
ઇષ્ટેષ્ટિમાનસેન્વા ચ ઇષ્ટેષ્ટસિદ્ધિદાવરા ॥ ૨૩૧॥

શ્રીનારદશિલોપાન્તા ગઙ્ગાસ્તોત્રસુપૂજિતા ।
ત્યાગરાજગુરુસ્વામિસત્કીર્તનૌઘસંસ્તુતા ॥ ૨૩૨॥

શ્રીનારદગુરુસ્વામિવીણાગાનલયસ્થિતા ।
નારદાનન્દગેયા ચ રાગતાલલયસ્તુતા ॥ ૨૩૩॥

શારદા શરસમ્પૂર્ણા શરદિન્દુરુચિસ્ફુરા ।
ક્ષપાનાથસ્મિતોર્મિશ્ચ ક્ષીરસાગરસન્નિભા ॥ ૨૩૪॥

વરાનન્દસ્વરાનન્દા વારિવિર્ષણહર્ષણા ।
ગુરુકીર્તનસઙ્ગીતા કવિમાનસસંસ્તુતા ॥ ૨૩૫॥

શઙ્કરાલયસઙ્ગીતા શિવશઙ્કરમજ્જના ।
ઓંકારશ્રુતિસન્નાદા નાદોંકારલયાલયા ॥ ૨૩૬॥

સઙ્ગમાતીતસૌન્દર્યા રવિરાજલસત્પ્રભા ।
વ્યસ્તદ્વિરઙ્ગસંયોગા રઙ્ગરઙ્ગણસત્પ્રભા ॥ ૨૩૭॥

મન્દાકિની મહાગઙ્ગા મહાદેવકૃપાવહા ।

પિણ્ડર્નન્દાકિનીધૌલીસઙ્ગતાલકનન્દભા ॥ ૨૩૮॥

શિવા વિષ્ણુપદોદ્ભાવા ભદ્રંકરી ભયઙ્કરી ।
સુસ્વરા સુસ્વરાનન્દા સુસ્વરાહ્લાદકારિણી ॥ ૨૩૯॥

વિષ્ણુગઙ્ગા શિવાનન્દા રુદ્રપ્રયાગસઙ્ગમા ।
સત્યકામપ્રસાદા મા સદાશિવવરપ્રદા ॥ ૨૪૦॥

ભગ્નીભાગીરથીતીર્થાસન્ધિતાલકનન્દભા ।
દેવપ્રયાગપુણ્યૌઘા ગઙ્ગાનામનદીવરા ॥ ૨૪૧॥

શિખ્યુત્તુઙ્ગહિમોદ્ભાવા ગાઢકન્દરસઙ્ગમા ।
લોકકલ્યાણમાર્ગા ચ નરોદ્ધારણધાવની ॥ ૨૪૨॥

રઘુનાથપદાવાહા રઘુનાથદયાવહા ।
પુરાણી પૂરણી ગઙ્ગા બહુગીતતપસ્સ્થલા ॥ ૨૪૩॥

અતિચણ્ડાલકાનન્દા ભાગીરથી ભયઙ્કરી ।
સમાશ્લિષ્ટસલાવાહા ગઙ્ગાનામ્ન્યતિસુન્દરી ॥ ૨૪૪॥

દરીવાહપયઃપૂરા નેત્રપૂરણવીક્ષણા ।
લક્ષણાઙ્કિતનીરા ચ શુભલક્ષણલક્ષિતા ॥ ૨૪૫॥

તરઙ્ગકરતુઙ્ગા ચ આશીકરી વશીકરી ।
અતિક્ષિપ્રગરીતિશ્ચ લોકયાનસુતત્ત્વની ॥ ૨૪૬॥

દારુણા દારિતાજ્ઞાના દ્રાવિતાઘાનુબન્ધના ।
વારિવર્ષિતકારુણ્યા દ્રવરૂપાપરાવરા ॥ ૨૪૭॥

સદયા સુબલા માતા અબલાપોહનાજરા ।
જરાદ્યપોહના ગઙ્ગા આધિવ્યાધિવિનાશિની ॥ ૨૪૮॥

બહુસ્નાતોપભુક્તા ચ બહુવેલનિમજ્જના ।
પ્રભાતોદ્દિનસન્ધ્યાદિનાન્તસ્નાનસુભાવના ॥ ૨૪૯॥

જીવસંરક્ષણાર્થાલગનીયલોહશ◌ૃઙ્ખલ-
-ગ્રાહણાવેગભીષ્મપ્રવાહદેવપ્રયાગખા ॥ ૨૫૦॥

અવિસ્મૃતવ્યભુક્તિશ્ચ વિસ્મૃતવ્યેતરાગતા ।
રજનીક્ષીરગઙ્ગા ચ દિવાદ્યુતિવરારકા ॥ ૨૫૧॥

નૈત્યદા નિત્યમાઙ્ગલ્યા નિત્યપ્રેરણહેતુકા ।
સૌદામનીયસમ્ભાસા સૌમઙ્ગલોદકાસુકા ॥ ૨૫૨॥

સંસારતાપમધ્યાહ્નમનોગહ્વરદર્શિતા ।
પારસમ્પઠિતસ્તોત્રા સ્તોત્રગીતસમર્ચિતા ॥ ૨૫૩॥

રોધખણ્ડનવેગાર્ણશ્ચિત્તવૃત્ત્યવરોધકા ।
રોદસીવાહદિવ્યા મા નિત્યકૃત્યાભિવન્દિતા ॥ ૨૫૪॥

સતોપાન્તાલકાનન્દા ભાગીરથી સુગોમુખી ।
ઉત્તુઙ્ગોર્મિસુનૃત્યા ચ સ્વાગતાહ્લાદસઙ્ગમા ॥ ૨૫૫॥

શમવાહાલકાનન્દા અટ્ટહાસભગીરથી ।
કરોર્મ્યાશ્લિષ્ટસત્પુત્રી સમ્મૃષ્ટાનન્દકારિણી ॥ ૨૫૬॥

આશીકરોર્મિવાહા મા સુધાપ્લાવસુમજ્જના ।
સત્ત્વપાનીયસંવર્ષા સત્ત્વશ્રીરામસેચના ॥ ૨૫૭॥

શીતાપા સુહિતા ગઙ્ગા આશીકરોર્મિનન્દિની ।
શીતામ્બુસ્પર્શનાનન્દા આનન્દકન્દયોગિની ॥ ૨૫૮॥

અરોધચિન્તનારોધા અરોધકવિતાસરી ।
અરોધવારિવેગા ચ અરોધોંકારનાદિની ॥ ૨૫૯॥

દયાપયોવહા ગઙ્ગા દશાનનરિપુસ્તુતા ।
દિનનક્તસ્મૃતા માતા દિવ્યલાવણ્યસસ્ફુરા ॥ ૨૬૦॥

દિવ્યા મરકતશ્યામા દિવ્યપ્રયાગદર્શના ।
દિવ્યાનુભવસઙ્ગીતા દિવ્યનામ્ની સુગઙ્ગિકા ॥ ૨૬૧॥

સત્સ્તોત્રગીતસંતોષા સંતુષ્ટિદાયિની જની ।
સંતુષ્ટિપાઠસદ્બોધા વિનયસ્તુતમઙ્ગલા ॥ ૨૬૨॥

ગઙ્ગા ગમનગામ્ભીર્યા ગાનમાધુર્યવાક્સ્થિતા ।
મઙ્ગલાનન્દમાર્ગા ચ અશોષા શોષિતાશયા ॥ ૨૬૩॥

અશોષ્યકવિતાધારા અનત્યુક્તિસ્તુતિસ્ફુરા ।
અવિશ્રાન્તસુવાગ્વર્ષા વિશ્રાન્તકવિતાસુખા ॥ ૨૬૪॥

બહુલપ્રસ્તુતા દેવી બહુરાગનિરઞ્જની ।
બહુરાસતરઙ્ગા ચ બહુમાન્યા બહુસ્રુતિઃ ॥ ૨૬૫॥

તૃપતદ્યુતિસંધૌતા તારસાનસિશોભિની ।
ધૃણિરાજવિરાજાભા ધૃણિની સુધૃણીવતી ॥ ૨૬૬॥

રાત્રીરજતરાજી ચ દિવારૌપ્યસુપત્રિકા ।
યાત્રાયાસાપહા ગઙ્ગા દિવ્યનવ્યસુજીવના ॥ ૨૬૭॥

સુગૃહીતસુનામ્ની મા સુવાક્સરણિધાવની ।
સત્ત્વાસક્તિસ્તુતા ગઙ્ગા સત્ત્વસંસ્ફૂર્તિદાયિની ॥ ૨૬૮॥

નિત્યા સુયૌવના ગઙ્ગા નિત્યયૌવનદાયિકા ।
સત્યા સલક્ષણા માતા સુદામગસુદામગા ॥ ૨૬૯॥

સુમના સુમખા સુસ્થા સુવેગા ચ સુભેષજા ।
સુસ્નાના સુસ્વના સૂક્તા સુસ્રવન્તી સુભોગદા ॥ ૨૭૦॥

કવિતાભાસભાસન્તા ભાસમાનસરિદ્વરા ।
ગઙ્ગા ગમનવિશ્રામા વિશ્રાન્તિદાયિની વની ॥ ૨૭૧॥

અનશ્વરપ્રકીર્તિશ્ચ અનશ્વરા વનેચરા ।
નશ્વરાસક્તિવિદ્રાવા નષ્ટશોકાઘમણ્ડલા ॥ ૨૭૨॥

કાવરા ગાવરા ગઙ્ગા ભાવરા નાદમોદિની ।
ખાવરા સુસ્રવા ગઙ્ગા સુસ્વરામોદદાયિની ॥ ૨૭૩॥

લયલાસ્યસુગામ્ભીર્યા સ્વરાતિમૃદુમાધુરી ।
મૃદ્વઙ્ગા મૃદુભાષા મા મધુગઙ્ગા મતિપ્રદા ॥ ૨૭૪॥

ગઙ્ગાત્યદ્ભુતસૌન્દર્યા અતિલાવણ્યવાહિની ।
અતિસ્વાદુજલા ગઙ્ગા સ્વાદિષ્ઠફલદાયિની ॥ ૨૭૫॥

આભોગા ભોગતૃષ્ણાહા ભોગદા ભોગ્યભક્તજા ।
ભક્તાજીવનજીવા ચ ભક્તાજીવનજીવના ॥ ૨૭૬॥

ઘનારણ્યોદ્વહા ગઙ્ગા વનોત્સઙ્ગાતિમુગ્ધતા ।
શ્વેતબાલૂકપારા ચ હરિકીલાલશોભના ॥ ૨૭૭॥

સબલિસ્નાનસમ્મગ્ના કૌષેયપેયતોષિણી ।
સ્નાનાનન્તરનિધ્યાતા સ્નાનપાનનિરન્તરા ॥ ૨૭૮॥

કૌશેયતલગામ્ભીર્યા કૌશલ્યાસુતસંસ્તુતા ।

કૌશેયગેયગેયસ્થા ત્યાગરાજસુતાવની ॥ ૨૭૯॥

શુદ્ધસ્ફટિકકાચારા કાચકાઞ્ચનકાવરા ।
દૌકૂલસ્પર્શનાનન્દા સ્નાનાત્યદ્ભુતશીકરી ॥ ૨૮૦॥

હરિતારણ્યકંબિમ્બા શુદ્ધનીલપ્રકાશિની ।
હરિવર્ણસુકાન્તિશ્ચ સ્તિમિતપ્રવહા સુગા ॥ ૨૮૧॥

હૈમાચલચલા ગઙ્ગા હૈમાભાસ્કુરભામિની ।
મઙ્કુરાદર્શકાભાસા મનોમઙ્કુરલાસિની ॥ ૨૮૨॥

પૂતપ્રસન્નકીલાલા તલનિમ્નશિલાગુણા ।
પ્રાકૃતચ્છવિભાસા ચ અપ્રાકૃતયશોમયી ॥ ૨૮૩॥

આધારબ્રહ્મનૈર્ગુણ્યા શુદ્ધચૈતન્યસુપ્રભા ।
આસ્તારતલગુણ્યા ચ સગુણબ્રહ્મસત્પ્રભા ॥ ૨૮૪॥

અધોબ્રહ્મસ્વભાવા ચ બ્રહ્મત્વતત્ત્વકાશિની ।
તલપ્રકૃતિબિમ્બા ચ બ્રહ્માનન્દપ્રકાશિની ॥ ૨૮૫॥

અજ્ઞાનમલિનાધાવા પ્રજ્ઞાનપુષ્ટિવર્ધિની ।
અજ્ઞાનાવસ્થિતાશ્રાયા જ્ઞાનસૂર્યપ્રકાશકા ॥ ૨૮૬॥

પારબાલૂકસંધ્યાતા સન્ધ્યાચ્છવિમનશ્શમા ।
પરાનન્દગભીરા ચ મનોગભીરસાન્ત્વિની ॥ ૨૮૭॥

પક્ષિસુસ્વરસન્નાદા નાદમૂલપ્રશાન્તિકા ।
પ્રશાન્તરીતિકાવાહા તત્ત્વાર્થબોધનાપગા ॥ ૨૮૮॥

શર્કરી રુચિરા ગઙ્ગા શોકવાહા સુખાવહા ।
અચલપ્રશમાવાહા મૌનમધ્યસુખસ્વરા ॥ ૨૮૯॥

પ્રદોષાપારરમ્યા ચ પ્રદોષશમસાલયા ।
પ્રણવાધસ્થશાન્તિશ્ચ પ્રણવપ્રશમાલયા ॥ ૨૯૦॥

નાદાદિપ્રણવાકારા પ્રણવામૂલનીરવા ।
નીરવોદ્ભાવનાદા ચ પ્રણવાકારસુસ્વરા ॥ ૨૯૧॥

ઘનગાનઘનારામા ઘનનીરવસુસ્વરા ।
નીરવાનીરસંગાઢા નીરવામૃદુગારવા ॥ ૨૯૨॥

ઘનપાલાશવર્ણાભા બાલુકાનીરવાવહા ।
ઘનપાષાણરાસા ચ ઘનાન્ધકારરોહિણી ॥ ૨૯૩॥

નીરસ્મિતોદયાદિત્યા નીરસૌમેરુકસ્ફુરા ।
નીરસ્મેરસ્તુતિસ્તોત્રી નીરપારપ્રવાહિણી ॥ ૨૯૪॥

ઋતુપર્યાયવૈચિત્ર્યા સન્દૃષ્ટપ્રકૃતિક્રમા ।
સ્વભાવાવિકૃતા ગઙ્ગા વિશ્વપ્રકૃતિકર્કરા ॥ ૨૯૫॥

ગ્રીષ્મપીનપયોધારા હૈમન્તશમિતાવહા ।
સ્વચ્છપ્રશાન્તિસમ્ભાસા વર્ષામ્બુવર્ણમૃત્તિકા ॥ ૨૯૬॥

હૈમન્તહરિનીલાભા શરદિન્દુખબિમ્બકા ।
નીરકેલાસસાભાસા બિમ્બપ્રકૃતિમઙ્કુરા ॥ ૨૯૭॥

ઇન્દુસૌન્દર્યકંબિમ્બા ઇન્દુશેખરશેખરી ।
બિમ્બેન્દુપૂરદુગ્ધૌઘા વિદ્યુત્સ્ફૂર્તિપ્રભાસિની ॥ ૨૯૮॥

ફેનદ્યુતિહરિશ્વેતા ફણિશાયિપદોદકા ।
નીલાકૃતિઘનશ્યામા નીલનિર્મલનીરભા ॥ ૨૯૯॥

શિશિરાવર્ણસૌવર્ણા તપ્તમાનસશીતલા ।
શૈશિરોદકસૌખ્યા ચ તપોયુક્તમનશ્શમા ॥ ૩૦૦॥

કોલાહલાચલા ગઙ્ગા આક્રોશોપલવાહિની ।
બાલૂકશાન્તરીતિશ્ચ શમશામિતવાહિની ॥ ૩૦૧॥

ગિરિમધ્યાવહા ગઙ્ગા ગિરિજાલપ્રસર્પિણી ।
હૃષીકેશપ્રતીતિશ્ચ બહુલાસ્યતરઙ્ગિણી ॥ ૩૦૨॥

હૃષીકેશસ્મિતા ગઙ્ગા હૃષીકેશસ્થલસ્તુતા ।
હૃષીકેશપદાઙ્કા ચ હૃષીકેશપદોદ્ભવા ॥ ૩૦૩॥

હૃષીકેશાતિવૈશાલ્યા હૃષીકેશદમાલિકા ।
હૃષીકેશકવિસ્ફૂર્તિર્હૃષીકેશસ્ફુટસ્તુતિઃ ॥ ૩૦૪॥

ધીશક્ત્યુત્તેજના ગઙ્ગા ધીમતી શ્રીમતી સતી ।
ચિચ્છક્ત્યુદ્બોધકારા મા ચિન્તિતાર્ચિતશ્રીધરી ॥ ૩૦૫॥

વિરક્તચિત્તસુજ્ઞાના જ્ઞાનાનન્દફલાવહા ।
યોગલીનત્વસંવર્ધા તપસ્સાધનસુસ્થલા ॥ ૩૦૬॥

શ્રીકરી શીકરી માતા શીકરસ્પર્શલાલિની ।
કોપતાપહરા ગઙ્ગા પાપાપહસુદર્શિની ॥ ૩૦૭॥

ગઙ્ગા ગામ્ભીર્યપર્યાયા મીરપારપ્રવાહિણી ।
કમનીયા મનોરમ્યા કામારિસુખશીતલા ॥ ૩૦૮॥

નગજા નગસંવાહા અનઘા અચલપ્રભા ।
નગજાહ્લાદગાયસ્થા અચલાર્ગલલાસ્યગા ॥ ૩૦૯॥

કુઙ્કુમાઙ્કિતશોભા ચ કુસુમાર્ચનભાસુરા ।
મઙ્ગલાઙ્કા શુભોત્તુઙ્ગા માધુર્યતમસુસ્વરા ॥ ૩૧૦॥

કવિતાપ્રેરણા ગઙ્ગા કવિતાર્ષલયસ્થિતા ।
સ્ફૂર્તિસ્મેરસુવાક્શ્રીશ્ચ સ્ફૂર્તિમૂલમદમ્બિકા ॥ ૩૧૧॥

કવિતાભાસસમ્ભાસા ભાસમાનસુગઙ્ગિકા ।
ભાસ્કરદ્યુતિશોભા ચ પ્રાલેયરશ્મિમોહિની ॥ ૩૧૨॥

પ્રત્યક્ષકવિતાહર્ષા કવિતાહ્લાદનાદિની ।
કવિમાનસસંહર્ષા કાવ્યામોદાતિમોદિની ॥ ૩૧૩॥

યાત્રાપરમુદાદર્શા ક્લાન્તિસંવાહમજ્જના ।
રાત્રીશીલાલના ગઙ્ગા પ્રાતર્દૃષ્ટિપ્રસાદિની ॥ ૩૧૪॥

અરુણોદયસુસ્નાતા સન્ધ્યાસ્નાનપ્રશાન્તિદા ।
ઊષપ્રશાન્તિસઁલ્લીના સાયંસન્ધ્યાપ્રશાન્તભા ॥ ૩૧૫॥

પ્રાગુષઃસ્નાનસાહ્લાદા દીપાવલિસુપૂજિતા ।
દીપજ્યોતિસ્સ્ફુરા ગઙ્ગા દૌકૂલામ્બરભામિની ॥ ૩૧૬॥

પ્રાક્સન્ધ્યારાગરાગાભા કલધૌતમયસ્ફુરા ।
ઊષાવાચ્યાતિરમ્યાષ્ટ્રા નિત્યમઙ્ગલસુસ્વરા ॥ ૩૧૭॥

સ્નાનપાનપરાગીતા ધ્યાનતત્પરસન્નુતા ।
પ્રવાહાન્તરકાઠસ્થતથ્યોપચારિણીનુતા ॥ ૩૧૮॥

ઉષોગાનશ્રુતિર્ગઙ્ગા પક્ષ્યનુસ્વરમોદિની ।
ઉષોગારાધિતા ગઙ્ગા જ્ઞાનેનોદયનાદિની ॥ ૩૧૯॥

ઉષસ્સઙ્ગીતરાગા ચ અરુણોદયસસ્મિતા ।

ભાતશાન્તિપ્રસાદા મા ગાનાઞ્જલિપ્રસાદિની ॥ ૩૨૦॥

શ્રીત્યાગબ્રહ્મસઙ્ગીતસત્કીર્તનૌઘવાહિની ।
શિષ્યાપુષ્પામુખશ્રોત્રી ગુરુકીર્તનનન્દિની ॥ ૩૨૧॥

દીક્ષિતાનૂતસઙ્ગીતમીનાક્ષી અન્નપૂરણી ।
દીપાવલિદિનામુક્તસિદ્ધદીક્ષિતસંસ્તુતા ॥ ૩૨૨॥

શ્રીદીક્ષિતકૃતિશ્રોત્રી શ્રીચક્રમધ્યદૈવિકા ।
સિદ્ધિપ્રસાદવીણાદા કાશીક્ષેત્રસુસમ્ભવા ॥ ૩૨૩॥

દીક્ષિતાઞ્જલિહસ્તોદા સિદ્ધિપૂર્ણપ્રસાદિની ।
હસ્તોદકસુવીણા ચ વીણાનાદપ્રમોદિની ॥ ૩૨૪॥

ગઙ્ગા ગિરીશશીર્ષસ્થા ગમ્ભીરગાયગામિની ।
તીર્થમૂલા કૃપાલુશ્ચ ખેલગા જહ્નુબાલિકા ॥ ૩૨૫॥

ધ્યાનસ્થા વરપાનસ્થા ગાનસ્થા નુતિગીતિકા ।
જ્ઞાનદીપપ્રદીપા મા નુતિદીપાવલિસ્ફુરા ॥ ૩૨૬॥

અરુણોદયપિઞ્જારા સહસ્રાર્ચિસ્સ્ફુરત્પ્રભા ।
તારતાવીષતેજસ્કા દ્યુતિલાસવિલાસિની ॥ ૩૨૭॥

સલિલાત્યૂષસંહર્ષા નેમદીપાવલિસ્મિતા ।
શિશિરાશિરસંશોભા હેમદીપસ્ફુરજ્જલા ॥ ૩૨૮॥

મેઘદીપાભમેઘા ચ ગીતદીપાવલીસુભા ।
રાગદીપાભરાગા ચ ધીદીપસ્ફુરદીપિકા ॥ ૩૨૯॥

ગીતમાતા નદીમાતા લોકમાતા સુરૂપિણી ।
શ્રીમાતા પ્રેષ્ઠધીમાતા માતૃગઙ્ગા નમસ્કૃતા ॥ ૩૩૦॥

પૂર્ણસૂર્યગ્રહાસ્નાતા શતવર્ષૈકસમ્ભવૈ-
-તદસાધારણાવૃત્તિત્રિકાલસ્નાતપાવની ॥ ૩૩૧॥

અવિસ્મૃતમહાસ્નાના સર્વપાપવિમોચની ।
બહુજન્મકૃતાઘૌઘસંવિમોચનકારિણી ॥ ૩૩૨॥

ભવિષ્યોદ્ધારિણી ગઙ્ગા વિશ્વાસાકમ્પિતાશ્રયા ।
એકભક્તૈકસંશ્રાયા મદમ્બા મમ તારિણી ॥ ૩૩૩॥

અજ્ઞાનતિમિરાહન્ત્રી સુજ્ઞાનસુરદીપિકા ।
સજ્જ્ઞાનમાર્ગસન્નેત્રી પુનરાવૃત્તિવારણી ॥ ૩૩૪॥

લોકકર્દમસામીપા અલૌકિકૈકમોદદા ।
સંસારદુઃખસંવાહા સંસારરાવસાન્ત્વિની ॥ ૩૩૫॥

તાપસાન્તા તપોભાન્તા માનસાન્તઃસુવાસિની ।
સત્ત્વાસક્તિસુસમ્પ્રાપ્તિઃ સત્ત્વાતીતપ્રશાન્તિદા ॥ ૩૩૬॥

નિત્યનૂતનનવ્યા ચ આરોગ્યયૌવનાવહા ।
સન્તપ્તમતિશીતા ચ તપ્તચામીકરાવરા ॥ ૩૩૭॥

નિત્યસ્નાનમનોવાહા નિત્યાનુભૂતિસંસ્તુતા ।
નિત્યનિષ્ઠાપરાગીતા નિત્યાનન્દપ્રવાહિણી ॥ ૩૩૮॥

ધનિની વિપુલા ગઙ્ગા અશિરા પ્રચુરા ચિરા ।
સદાયાના મહાયાના શુભયાના ચિરસ્થિરા ॥ ૩૩૯॥

ઉષાનન્દશુભસ્નાતા માધ્યાહ્નસંસ્કૃતસ્તુતિઃ ।
ઉષઃપ્રશાન્તિનિધ્યાતા સન્ધ્યાસ્નાનપરાનુતા ॥ ૩૪૦॥

ઉષઃકાન્ત્યતિશોભા ચ દિવાદિનમણિદ્યુતિઃ ।
ઊષકોંકારનાદા ચ ઉષસીરાગભાલયા ॥ ૩૪૧॥

ઉષઃકોકિલસઙ્ગીતા ગીતામોદપ્રસાદિની ।
ઊષેન્દ્રનીલજાલાભા સાયંસ્વર્ણાભભામિની ॥ ૩૪૨॥

પ્રાતઃશાન્તિમયા ગઙ્ગા સન્ધ્યારાગલસત્પ્રભા ।
સૌન્દર્યદેવતા ગઙ્ગા નેત્રોત્સવલસચ્છવિઃ ॥ ૩૪૩॥

ઝલ્લિકાચ્છાયપર્યાયા પઞ્ચમોભાગભાસુરા ।
પઞ્ચમસ્વરસુશ્રાવ્યા પક્ષિજાલકલસ્વરા ॥ ૩૪૪॥

સન્ધ્યારશ્મ્યતિશોભા ચ સન્ધિપ્રશાન્તિસુસ્વરા ।
ચિદાકાશસુનીલાભા નીલખાભ્રબલક્ષકા ॥ ૩૪૫॥

અષ્ટોત્તરશતામગ્ના શતિનામજપસ્ફુરા ।
નામસઙ્કીર્તનાનૂતા નામગાનલયસ્થિરા ॥ ૩૪૬॥

નાદસ્વરરસારાસા નાદપ્રશાન્તિસાન્ત્વદા ।
નાદાર્થિહૃન્નદાનાદા નાદસાત્મત્વસાધના ॥ ૩૪૭॥

નામપ્રભાવસન્નાદા નાદાનન્દસુનાદિની ।
નુતિનામસમષ્ટિસ્થા નામપુષ્પાસવસ્રવા ॥ ૩૪૮॥

પાષાણખણ્ડસન્નાદમૃદઙ્ગમૃદુલધ્વનિઃ ।
પક્ષિસમસ્વરોડ્ડીનાકાશમાર્ગસુગામિની ॥ ૩૪૯॥

આદર્શતલસંદર્શા ઈશ્વરાદર્શદર્શના ।
નીરવારવગામ્ભીર્યા સન્ધ્યાનીરવમાધુરી ॥ ૩૫૦॥

સન્ધ્યાસ્વર્ણમયા ગઙ્ગા સૂર્યરશ્મિસ્ફુરજ્જલા ।
સન્ધ્યાસ્નાનસ્તુતાગીતા સન્ધ્યાદીપાભિપૂજિતા ॥ ૩૫૧॥

બહુવર્ણલસત્તોયા સન્ધ્યારાગસુરાગિણી ।
તરલોર્મિસુરઙ્ગા ચ ચારુસૌવર્ણલાસિની ॥ ૩૫૨॥

નીલસ્વર્ણસ્ફુરત્કાન્તિર્વિદ્યુત્પ્રભાવિલાસિની ।
સન્ધ્યારમ્યસમુલ્લાસા સન્ધ્યારૂપમનોહરી ॥ ૩૫૩॥

ચિન્તિતાદર્શિતા ગઙ્ગા સ્નાતા પીતા સુકીર્તિતા ।
સદાધ્યાતા મદામોદા મનસ્કૂટા મયસ્કરી ॥ ૩૫૪॥

તાપિતાત્મશ્રયા ગઙ્ગા તપોમાનસજીવની ।
જલજાનન્દસાનન્દા જલસ્ફૂર્તિસુહેતુકા ॥ ૩૫૫॥

વિષયાસક્તિકૂપાદ્વિદૂરાત્મસુખદાયિની ।
દુર્ગપાષાણપારા ચ અપારાત્મલયાવની ॥ ૩૫૬॥

સંસારરાવમધ્યૈકજ્ઞાનકોકિલસુસ્વરા ।
સારહીનૈહિકપ્રાતિકૂલ્યાતિસારસારકા ॥ ૩૫૭॥

જીવશક્તિસ્ફુરન્નીરા નીરસ્ફુરણભાસ્કરા ।
જીવસ્ફુરણપારા ચ સ્ફૂર્તિપ્રેરણજીવના ॥ ૩૫૮॥

જીવનાધારધારા ચ જીવની નતજીવની ।
જીવાધારસુનાડી ચ જીવધારસુજીવના ॥ ૩૫૯॥

સ્નાનધ્યાનશમાધારા પાનનામલયાવહા ।
ધ્યાનજ્ઞાનફલાધાત્રી ગાનતત્પરસત્ફલા ॥ ૩૬૦॥

સલિલાત્યૂષનૈર્મલ્યા સતતાશ્વેતનિર્મલા ।

હિમાદ્ઘમૃતસંવાહા વાસુરાહિમભાસુરા ॥ ૩૬૧॥

પર્જન્યશ્યાવવાર્યોઘા પારોત્કૂલપ્રવાહિણી ।
વર્ષશ્વેતકુહેલી ચ વાર્ષિલાસ્ફટિકાયુતા ॥ ૩૬૨॥

અતિવૃષ્ટ્યતિવેગા ચ અતિચારુભયઙ્કરી ।
અતિચણ્ડમરુદ્ઘૂર્ણા ગઙ્ગા સાષ્ટાઙ્ગવન્દિતા ॥ ૩૬૩॥

નાનાવૈચિત્ર્યસૌન્દર્યા ઉડ્ડીનગુત્સશીકરી ।
ધારાધવલગુત્સા ચ વાયુવેગસુનૃત્યકા ॥ ૩૬૪॥

વાયુવેગા મનોવેગા કવિવેગપ્રવાહિણી ।
મનોવેગસ્થિતા ગઙ્ગા મનોલાલસપૂજિતા ॥ ૩૬૫॥

નિત્યનૂતનવેલા ચ નિત્યયૌવનશીતલા ।
નિત્યનૂતનવાક્ચેલા નિત્યનૂતનવાઙ્મયી ॥ ૩૬૬॥

નિત્યારમ્યાતિભવ્યા ચ સુભદ્રા ભદ્રવાઙ્મયી ।
કાવ્યાનન્દાતિસૌવર્ણા કવિશ્રેષ્ઠસુવર્ણિતા ॥ ૩૬૭॥

વર્ણનીયા સુવાગ્વર્ણા વાગ્વર્ણપરિપૂર્ણકા ।
વર્ણવાગ્વર્ષવર્ણા ચ વાગ્વર્ષપરિતોષિતા ॥ ૩૬૮॥

વર્ણનાતીતસૌવર્ણા વર્ણવાગ્વર્ષવર્ણિની ।
વર્ણકાવર્ણરૂપા ચ વર્ણવાગ્લાસલાસિની ॥ ૩૬૯॥

બહુવર્ણલસદ્ભાસા બહુરાગતરઙ્ગિણી ।
ઋતુરઙ્ગવિધારઙ્ગા વિવિધારઙ્ગરઙ્ગિણી ॥ ૩૭૦॥

વસન્તગ્રીષ્મવર્ષાલુશરદ્ધૈમન્તશૈશિર-
-ઋતુપર્યાયપર્યાપ્તરઙ્ગચ્છવિતરઙ્ગિતા ॥ ૩૭૧॥

ગ્રીષ્મહૈમક્ષરાસારા ક્ષરિદ્વૈરપ્રવાહિણી ।
હૈમન્તાચ્છબલાહા ચ શરચ્ચન્દ્રદ્યુતિસ્ફુરા ॥ ૩૭૨॥

પિકાનન્દવસન્તાઘોષમિષ્ટસ્વરપૂરિતા ।
ગઙ્ગા રઙ્ગણસૌરઙ્ગા મતિતારાગણસ્ફુરા ॥ ૩૭૩॥

ગ્રીષ્મગૌરપ્રવાહા ચ વર્ષપઙ્કિલવર્ણિની ।
હિમર્તુસ્વચ્છનીલાભા શુક્લપિઞ્જારવાહિની ॥ ૩૭૪॥

પ્રાતર્ધૂસરખર્જૂરા સીરગોગૌરગૈરિકા ।
પ્રદોષશ્વેતનીલા ચ નીલજીમૂતસન્નિભા ॥ ૩૭૫॥

શ્વેતનીલા હરિચ્છાયા શ્યામસુન્દરવર્ણભા ।
કનકાઙ્કુલસદ્રઙ્ગા સાયમ્પ્રશાન્તિદીપિની ॥ ૩૭૬॥

સન્ધ્યાનીલપ્રશાન્તિશ્ચ શુદ્ધનીલા ઘનાઘના ।
પિઞ્જારકૌશવસ્ત્રાભા શ્યેતા શ્યામા સુરાગભા ॥ ૩૭૭॥

ચિત્રરઙ્ગતરઙ્ગા ચ ગઙ્ગા રઙ્ગતરઙ્ગિણી ।
રયમધ્યશિલારૂઢશ્લક્ષ્ણપક્ષિસ્વરાનુતા ॥ ૩૭૮॥

ચન્દ્રોદયાતિરમ્યા ચ ચન્દ્રચન્દ્રસ્ફુરચ્છુભા ।
ક્ષીરોદસન્નિભાશુક્લા તારાસાન્દ્રસ્મિતપ્રભા ॥ ૩૭૯॥

સૌવર્ણા વર્ણવાગ્રાસા સૌવર્ણવર્ણલાસિની ।
રામા કૃષ્ણા સુમેઘા ચ ઘનાઘનઘનસ્વના ॥ ૩૮૦॥

વર્ણસ્ફુટસુગાચ્છાયા કવિવર્ણનવર્ણભા ।
વર્ણવર્ણનવર્ણા ચ વર્ણાવર્ણસુવર્ણકા ॥ ૩૮૧॥

ચેતોહરા સુહીરા ચ ચારુગાચારુગામિની ।
સલિલાદ્ભુતમાધુર્યા સ્મિતસ્મેરતરઙ્ગિણી ॥ ૩૮૨॥

વર્ણસમ્પૂજિતા માતા વર્ણાપર્ણાવરાવરા ।
વર્ણજાલસુહૃદ્ધારા વર્ણવર્ણસુવર્ણભા ॥ ૩૮૩॥

રજતાશ્વેતમુત્યા ચ શુદ્ધશ્વેતસુશોભના ।
પિઙ્ગકૌસુમ્ભવર્ણાભા હિરણ્યાભતડિત્પ્રભા ॥ ૩૮૪॥

હરીન્દ્રનીલકાન્તિશ્ચ સ્વચ્છસ્ફટિકકાહરા ।
હરિતાપિઙ્ગલાશોભા તપ્તચામીકરાકરા ॥ ૩૮૫॥

ઇન્દ્રચાપચ્યુતાવર્ણા ચન્દ્રબિમ્બલસત્પ્રભા ।
વન્દ્રશાપવિમોક્ત્રી ચ વન્દ્રચિત્તાબ્જચન્દ્રિકા ॥ ૩૮૬॥

શ્વેતાશ્વેતાચલાનન્દા શ્વેતમુત્યસુભૂષિણી ।
શ્વેતામ્બરામ્બરાશ્વેતા સત્ત્વશ્વેતસુદિવ્યભા ॥ ૩૮૭॥

સૌવર્ણવર્ણકોલ્લાસા શુક્લપિઙ્ગાશશોભના ।
અતિનીલા હરાભાસા કંદર્પણપ્રસન્નતા ॥ ૩૮૮॥

લોકસન્તાપસંવાહા તપ્તજામ્બૂનદાનદા ।
રૂપવર્ણાતિરિક્તા ચ વર્ણપ્રવાહવાહિની ॥ ૩૮૯॥

નીરસ્ફુરન્નિશારાજ્ઞા ઉષોનિર્માલ્યદર્શના ।
નિર્માલ્યદર્શનાભાસા નિષ્કામપૂજિકોદ્ધરા ॥ ૩૯૦॥

કૌશામ્બરધરા દેવી કૌશેયસ્પર્શલાલિની ।
કૌશેયાભાતિદૌકૂલા કૌશેયહરિવર્ણિની ॥ ૩૯૧॥

રજતા મા રજોપોહા તમઆવૃતપાટિની ।
રજસ્તમોઘવિદ્રાવા રજતસ્ફુરભામિની ॥ ૩૯૨॥

શુદ્ધસત્ત્વસુશોભા ચ સત્ત્વાનન્દપ્રકાશકા ।
હૈમકૌશેયસમ્ભાસા હૈમદાહૈમસજ્જલા ॥ ૩૯૩॥

નીલશ્યામઘનાભાસા શ્વેતવર્ણા હરિપ્રભા ।
શોભામરકતાભા ચ કૌસુમ્ભપિઞ્જરાજરા ॥ ૩૯૪॥

વિવિધારઙ્ગરઙ્ગાભા નીલાકાશસુદર્પણા ।
સલિલાકાશસૌવર્ણા નીલવર્ણહરિપ્રિયા ॥ ૩૯૫॥

રઙ્ગવૈચિત્ર્યરમ્યા ચ અત્યૂષમૃદુરઙ્ગિણી ।
તપનાગમભાચ્છાયા દિનાન્તબહુરઙ્ગિણી ॥ ૩૯૬॥

વાસરાશિરભાસા ચ વાસુરાશશિભાસુરા ।
અસમાનબૃહદ્ભાસા કવિમાનસવાસના ॥ ૩૯૭॥

તાપનાતાપશીતા ચ તપ્તમાનસશીકરી ।
તાપસાર્ચિતવાગ્દેવી તપસ્સ્ફૂર્તિનિવેદના ॥ ૩૯૮॥

ગઙ્ગા દિવ્યાપગા દેવી સદાસ્મૃતવરાનના ।
નાનારૂપા સુનામ્ની ચ નામતારકપાવની ॥ ૩૯૯॥

ચિદ્રૂપા રૂપસાનન્દા શુદ્ધકા શુચિરૂપિણી ।
હૃદ્ગતા મમ ત્રાત્રી મા ગુણ્યા ગુણૌઘવાહિની ॥ ૪૦૦॥

દ્રુતગાઙ્ગેયકા ગઙ્ગા સૌમેરુકોદકાવની ।
દાન્તસંરક્ષણા ગઙ્ગા જ્ઞાનજ્યોતિઃપ્રદીપની ॥ ૪૦૧॥

તલદર્પણસમ્ભાસા તરુણારુણરશ્મિભા ।

કલસ્વરા સ્વરાભાસા કલસ્વરાર્ચિતાસુદા ॥ ૪૦૨॥

તરઙ્ગાવલિનીરાભા નિસ્તરઙ્ગપ્રશાન્તિદા ।
તરઙ્ગરઙ્ગરઙ્ગાભા રઙ્ગશાયિસુરાગગા ॥ ૪૦૩॥

નીરરઙ્ગસુરાગા ચ નીરસ્મેરસુલક્ષણા ।
નીરજાનન્દવાગ્ધારા નીરજાહ્લાદગાયના ॥ ૪૦૪॥

ક્લાન્તિચ્છિદ્ગનગાના ચ શ્રાન્તમાનસસાન્ત્વિની ।
શ્રિતાનન્યૈકસૌખ્યા ચ શ્રુતોંકારસુનાદિની ॥ ૪૦૫॥

જીવનાજીવનાગમ્યા જીવજીવનજીવની ।
જીવનાનન્દજીવા ચ જીવનામગ્નનન્દિની ॥ ૪૦૬॥

જીવનાસક્તિજીવા ચ આજીવનાર્હ્યવત્સલા ।
આજીવજીવનાસ્નાનલાલસાપૂરસત્સલા ॥ ૪૦૭॥

ચારુકા ચારુપર્યાયા ચારુહાસસુલાસિની ।
ચારુવૈચિત્ર્યલાવણ્યા ચારુગોત્રસુગોત્રિણી ॥ ૪૦૮॥

સહસ્રાર્ચનનામાભા નામસારાતિસારકા ।
સહસ્રશ્લોકવાગ્વર્ષા સહસ્રાયુતવાચિકા ॥ ૪૦૯॥

હરિદશ્વસ્ફુરા ગઙ્ગા સહસ્રાર્ચિસુતેજસા ।
સહસ્રાયુતદોષઘ્ની સહસ્રશ્લોકભાસુરા ॥ ૪૧૦॥

હરિનામસહસ્રાભા હરિભક્તિસુમાર્ગિણી ।
હરિપાદોદકા ગઙ્ગા હરિદ્વારવિલાસિની ॥ ૪૧૧॥

હરિદ્વારમહોત્સાહા હરિનામસુલાસિની ।
હરિભક્ત્યાવહા ગઙ્ગા હરિસાત્મીકરાધરા ॥ ૪૧૨॥

હરિનામસહસ્નાતા હરિદ્રાકુઙ્કુમાર્ચિતા ।
હરિકારુણ્યવેગૌઘા હરિપૂજનપૂજિતા ॥ ૪૧૩॥

હરિનામસુમપ્રીતા હરિમાધવનામગા ।
હરિકેશવગોવિન્દનામસઙ્કીર્તનાવહા ॥ ૪૧૪॥

નેત્રપૂરણપૂરૌઘા નેત્રાનન્દસુરૂપિણી ।
મનઃપૂરણપૂર્ણૌઘા માનસસ્થિરગામિની ॥ ૪૧૫॥

ઉષસ્સ્નાતા સુસઙ્ગીતા સાયન્દીપસુમાર્ચિતા ।
દીપાભારુગ્મસમ્ભાસા સન્ધ્યારતિસુવૈભવા ॥ ૪૧૬॥

સન્ધ્યાભારાધિતા ગઙ્ગા સન્ધ્યાદીપસ્ફુરાવરા ।
સન્ધ્યાસુરાગસઙ્ગીતા સન્ધ્યારાગાતિદેવતા ॥ ૪૧૭॥

ભક્તિદીપસ્ફુરત્સ્વર્ણા સન્ધ્યારાગાતિરાગિણી ।
હરિદ્વારસુવૈશાલ્યા ક્ષિપ્રાતિસુખદાયિની ॥ ૪૧૮॥

ચલદીપાવલીદીપ્રા નિત્યદીપાવલિસ્ફુરા ।
સલદીપાવલીરાગા રાગદીપાલયસ્તુતા ॥ ૪૧૯॥

દીપાભાશોભિતા ગઙ્ગા જ્ઞાનાકાશપ્રદીપિની ।
બહુરાગલસદ્ભાસા દૃષ્ટમાત્રપ્રહર્ષદા ॥ ૪૨૦॥

હરિનામસુમસ્યૂમા નામપુષ્પાભિપૂજિતા ।
પરિપ્લાવ્યસુધાપ્લાવા તમોમલિનધાવની ॥ ૪૨૧॥

હરિરશ્મિમુદાસ્નાતા અતિવેગાભિનન્દિની ।
હર્ષાવિસ્મૃતભૂતિશ્ચ રાત્રીસ્નાનાતિમોદિની ॥ ૪૨૨॥

રાજભારાજરાજૌઘા રાજમાનશુચિસ્સ્ફુરા ।
રાજાધિરાજસંપૂજ્યા ભૂજાપૂજિતસુપ્રભા ॥ ૪૨૩॥

હરિનામસ્મરાસ્નાતા હરિકારુણ્યવાગ્વહા ।
હરિસઙ્કીર્તનાવાહા હરિદાસનુતિસ્ફુરા ॥ ૪૨૪॥

હરિનામસ્વરાગીતા હરિનામસુમાધુરી ।
હરિહારિગુરુપ્રીતા ત્યાગબ્રહ્મસુવાગ્વહા ॥ ૪૨૫॥

નાદાનન્દપયોવાહા નાદોપશમકારિણી ।
નાદાહૃતહરિદ્વારા નાદવૈશાલ્યવાહિની ॥ ૪૨૬॥

નિત્યાનધિકમાહાત્મ્યા નિત્યનિઃસીમવૈભવા ।
ભુક્તિમુક્તિપ્રદા ગઙ્ગા ભક્તિદા ભક્તિસેવિતા ॥ ૪૨૭॥

યાત્રાસન્તાપિતાહ્વાના પાંશુપટલધાવની ।
કર્માનુબન્ધધાવા ચ મોક્ષમાર્ગપ્રદર્શિની ॥ ૪૨૮॥

મલિનૈહિકનિર્ણેકા મનોમ્લાન્યુપમાર્જના ।
માતા ગઙ્ગા મદાશ્રાયા પ્રસત્ત્યચ્છપરીવહા ॥ ૪૨૯॥

વાક્પુષ્પાવલિસંશોભા વાક્સુમારાધિતા સિતા ।
વાગર્થા વાક્સુજાલસ્થા વાગૌઘા વરિવસ્યિતા ॥ ૪૩૦॥

ઉષોદીપાવલિસ્નાતા સન્ધ્યાદીપાવલિસ્ફુરા ।
નિત્યસ્નાનોત્સવા ગઙ્ગા નિત્યસન્ધ્યાસુદીપભા ॥ ૪૩૧॥

મહામકરસઙ્ક્રાન્તિપ્રાગુષસ્સ્નાનવૈભવા ।
સૂર્યચન્દ્રગ્રહાસ્નાતા સર્વકાલનિમજ્જના ॥ ૪૩૨॥

પ્રતિદ્વાદશવર્ષૈકકુમ્ભમેલામહોત્સવા ।
સહસ્રાયુતસન્ન્યાસિગણસેવિતસુસ્થલા ॥ ૪૩૩॥

યાત્રાસાર્થાયુતસ્નાતા બૃહદુત્સવતીર્થખા ।
આચારજીવનાડી ચ બહુમાનિતખાપગા ॥ ૪૩૪॥

સર્વકાલજનાસ્નાતા સર્વકાલપયોભરા ।
સર્વકાલાવિકલ્પા ચ સર્વકાલરુચિસ્ફુરા ॥ ૪૩૫॥

વેગાવરોધવેગા ચ મનોવેગાવરોધકા ।
વિક્ષેપમલિનાધાવા સ્પર્શનાશીતગઙ્ગિકા ॥ ૪૩૬॥

નિસ્તરઙ્ગમનોરઙ્ગા તરઙ્ગાભામનોહરી ।
પુણ્યા પુલકદા ગઙ્ગા સર્વલોકમુદાદદા ॥ ૪૩૭॥

સુબલા દુર્બલાપોહા દુઃખનિર્વૃત્તિકારિણી ।
મનોબલા નિરામર્ષા દેહારોગ્યપ્રવર્ધિની ॥ ૪૩૮॥

લોકનાટકસંદર્શા અલૌકિકૈકસાક્ષિણી ।
અલૌકિકાદ્ભુતાનન્દા લોકકર્દમધાવની ॥ ૪૩૯॥

અક્ષીણામૃતવારિશ્ચ શાશ્વતીયાભિનવ્યતા ।
સ્વાનુભૂતાતિપૂતિશ્ચ શાશ્વતીવહશાશ્વતી ॥ ૪૪૦॥

નવનવ્યપ્રવાહા ચ નવનવ્યસુકાવ્યગા ।
સુલભાવર્ષસુશ્લોકા કવિમાનસસૌષ્ઠવા ॥ ૪૪૧॥

અશોષકવિરીતિશ્ચ શોષમાનસતોષિણી ।
કવિતાલાસ્યસઁલ્લાસા તોષોલ્લાસસુપોષિણી ॥ ૪૪૨॥

નિત્યસ્તોત્રાભિગીતા મા નિત્યાનુરાગસન્નુતા ।

નિત્યનવ્યસુકાવ્યશ્રીર્નિત્યનવ્યા નિરોધહા ॥ ૪૪૩॥

નિત્યકોલાહલા ગઙ્ગા નિત્યત્વવ્યક્તરૂપિણી ।
નિત્યદર્શનસમ્પ્રાપ્તિર્નિત્યાનિત્યત્વબોધિની ॥ ૪૪૪॥

નિત્યા નિરામયા દેવી સત્યાનન્દચિદાત્મની ।
મિથ્યામધ્યૈકસત્યા ચ તથ્યવાક્સ્તુતમાતૃકા ॥ ૪૪૫॥

સત્ત્વાર્થિહૃત્સ્થિરા ગઙ્ગા સત્ત્વસંસ્ફૂર્તિદાયિની ।
સત્ત્વસઙ્ગા નગોત્સઙ્ગા ત્યક્તસઙ્ગૈકસઙ્ગિની ॥ ૪૪૬॥

શૈલોત્સઙ્ગપ્રવાહા ચ શૈલાવતીર્ણસુન્દરી ।
સર્વલોકકૃપાવાહા સમભૂમિપ્રવાહિણી ॥ ૪૪૭॥

ભદ્રસોમા અપાંશ્રેષ્ઠા લોકોદ્ધારાવતારિણી ।
લોકસન્તુષ્ટિદાત્રી ચ પાવની પાપધાવની ॥ ૪૪૮॥

સ્વાદુપર્યાયપાયૌઘા સ્વાદુનાદૌઘવાહિની ।
સ્વોવસીયસમાગઙ્ગા સ્વીકૃતસ્વાદુગાનગા ॥ ૪૪૯॥

ભદ્રવાગ્વર્ષસંસિક્તા સંસિક્તાનન્દમિષ્ટતા ।
માનસાપૂજસન્તુષ્ટા સઙ્ગીતભક્તિવાક્સ્થિતા ॥ ૪૫૦॥

ચિત્તપૂર્ણપયઃપૂરા ચિન્તનાવાહવાહિની ।
ચિન્તનાવાહવાહા ચ ચિન્તનાબાધશામની ॥ ૪૫૧॥

ચિત્તરન્ધ્રસ્ફુરદ્દીપા ચિચ્છક્ત્યુત્તેજના શિવા ।
ચિત્તદીપસ્ફુરન્નીરા ચિદાનન્દા ચિરસ્થિતા ॥ ૪૫૨॥

તાપનીયાતિકાન્તિશ્ચ તાપાપોહનતામરા ।
તાપસાન્તસ્સુસઞ્ચારા તપસ્તેજોભિવર્ધિની ॥ ૪૫૩॥

પૌનઃપુન્યનુતાસ્નાતા સુખાવહસુખાવહા ।
વાક્સલા વત્સલા ગઙ્ગા સલસમ્ભાસસદ્રસા ॥ ૪૫૪॥

ચલાચલાચલા ગઙ્ગા ચલચિત્તસ્થિરકરા ।
જલરૂપા જલાવાહા જલજાનન્દકારકા ॥ ૪૫૫॥

યમુનાસઙ્ગતા ગઙ્ગા અધોયુક્તસરસ્વતી ।
ત્રિવેણીસઙ્ગમાહાત્મ્યા તીર્થરાજપ્રયાગભા ॥ ૪૫૬॥

યમુનાગાઢનીલા ચ મૃત્તિકાવર્ણગઙ્ગિકા ।
સમવિસ્તીર્ણસંવાહા પ્રયાગોપમસાગરા ॥ ૪૫૭॥

ગઙ્ગા સ્વભાવસંશીતા ચણ્ડપ્રચણ્ડવેગિની ।
યમુનાનુષ્ણશાન્તા ચ ગઙ્ગીભૂતહરિપ્રિયા ॥ ૪૫૮॥

ત્રિવેણીસઙ્ગમાગઙ્ગા ત્રિલોકાનન્દદાયિની ।
ત્રિગુણાતીતસત્યા ચ ત્રિતાપાર્તિપ્રશામની ॥ ૪૫૯॥

દર્શનાનન્દપુણ્યા ચ દેવદર્શનતુષ્ટિદા ।
દેવતાસાર્વભૌમી મા ગઙ્ગા દર્શનમુક્તિદા ॥ ૪૬૦॥

પુણ્યસ્નાનસુપાના ચ બહુલસ્નાતસુસ્થલા ।
પારાતિદૂરસઙ્ગા ચ નૌકાપ્રાપ્યનિમજ્જના ॥ ૪૬૧॥

સૂર્યાસ્તવર્ણસમ્ભાસા દ્રવસૌવર્ણરઙ્ગિણી
કૌસુમ્ભારુણપિઞ્જારા વર્ણજાલસ્ફુરત્સલા ॥ ૪૬૨॥

સાયંસન્ધ્યાપ્રશાન્તિશ્ચ ચારુલાસ્યતરઙ્ગિણી ।
સન્ધ્યાસ્નાનકૃપાવાહા સન્ધ્યાધ્યાનલયાવહા ॥ ૪૬૩॥

અતિવિશ્વાસસસ્નાતા અતિપ્રેમસહાનુતા ।
અતિપ્રેષ્ઠવરાધાત્રી અતિસૌમઙ્ગલાવહા ॥ ૪૬૪॥

નવનવ્યકવિસ્ફૂર્તિનવનવ્યરુચિસ્ફુરા ।
નવનવ્યસુપાનીયા નવરાત્રીસુપૂજિતા ॥ ૪૬૫॥

શુષ્કમાનસસમ્પૂર્ણા પૂર્ણેન્દુવક્ત્રભામિની ।
શૂદ્રા સ્વર્ગોદકા ગઙ્ગા સૂકરાવતરસ્તુતા ॥ ૪૬૬॥

સઙ્ક્રાન્તિકુમ્ભમેલાસુમહોત્સવકુતૂહલા ।
સન્ન્યાસિજનસઙ્ઘાતસ્નાનકોલાહલસ્તુતા ॥ ૪૬૭॥

પૌર્ણમાવાસ્યસઙ્ગાઢા સૂર્યચન્દ્રગ્રહાપ્લુતા ।
સદાયાત્રિગણસ્નાના વિશેષદિનવૈભવા ॥ ૪૬૮॥

ગઙ્ગા ગમનલાવણ્યા શ્રમાપોહપરીવહા ।
સર્વકાલમનોરમ્યા શરતારભવાયના ॥ ૪૬૯॥

પ્રયાગબહુવિસ્તીર્ણા દૂરમાર્ગપ્રવર્તની ।
કાશીપુરપુરાણી ચ બહુલોદ્ધારપાવની ॥ ૪૭૦॥

પુણ્યકાશીમહાક્ષેત્રા દક્ષિણોત્તરવાહિની ।
વરુણાસીસુમધ્યસ્થા મહાસ્નાનવિમોચની ॥ ૪૭૧॥

દશાશ્વમેધયાગાનાં સમષ્ટિફલદાયિની ।
વિશ્વનાથાભિષેકામ્બા કાશીક્ષેત્રયશસ્વિની ॥ ૪૭૨॥

વિશ્વેશ્વરપ્રિયા ગઙ્ગા વિશ્વેશ્વરસ્તુતિપ્રિયા ।
વિશ્વરૂપા વિશાલાક્ષી વિશ્વસંરક્ષણાવની ॥ ૪૭૩॥

અન્નપૂર્ણા જગન્માતા સુસાન્નિધ્યસનાતની ।
કાશીપુરમહાપુણ્યા જીવોદ્ધારણપૂરણી ॥ ૪૭૪॥

કાશીક્ષેત્રશિવાનન્દા શિવરામસુનામગા ।
મોક્ષાનન્દપ્રસાદા મા ગઙ્ગા પરમપાવની ॥ ૪૭૫॥

શિવારામા શિવારામા શિવરામમનસ્વિની ।
ઉમારામશિવારામા રમારામરમાપ્લવા ॥ ૪૭૬॥

માવરોમાવરામોદા મા વરા માનસાર્ચિતા ।
નુત્યારામા નુતારામા રામનામસુમાર્ચિતા ॥ ૪૭૭॥

રામનામરસાપ્લાવા નામતારકતારિણી ।
શ્રીરામનામસમ્મિશ્રા નારાયણકૃપાવહા ॥ ૪૭૮॥

કેદારેશ્વરસાન્નિધ્યા ગૌરીકુણ્ડાતિપાવની ।
શિવાભિષેકતીર્થા ચ ત્રિકાલસ્નાનમોચની ॥ ૪૭૯॥

મનોજવૈરિલિઙ્ગાર્ચારૂપાભિષેચના શિવા ।
મનોજપૂજિતા માતા મનોજાપૂજનપ્રિયા ॥ ૪૮૦॥

મનોજરૂપસંવાહા મનોજપુત્રપાદકા ।
મનોજપુષ્પમાલાઙ્ગા મનોજામોદમણ્ડિતા ॥ ૪૮૧॥

મનોજાવસ્થિતા માતા મનોજાવસ્થશામની ।
મનોજવેગવેગા ચ મનોજવેદનૌષધી ॥ ૪૮૨॥

મનઃશ્રાન્ત્યપવાહા ચ ક્લાન્તિચ્છેદનસુસ્પૃશા ।
મનઃશાન્ત્યભિવાહા ચ મનઃપુષ્પાર્ચનસ્તુતા ॥ ૪૮૩॥

મનઃક્લેશાર્ચિતા ગઙ્ગા ક્લેશિતૈકાન્તમાનસા ।

મનોગતા નિરાતઙ્કા મનઆતઙ્કપૂજિતા ॥ ૪૮૪॥

શૂન્યમાનસસમ્પૂરા નિરાકાઙ્ક્ષાતિકાઙ્ક્ષિતા ।
નૈરાશ્યાપોહના ગઙ્ગા નૈશ્ચિન્ત્યસુફલપ્રદા ॥ ૪૮૫॥

દૈવિકા દૈવસમ્પ્રીતા દૈવત્યફલદાયિની ।
વેદવાક્યમહત્સારા વેદવેદ્યાભિવાદિની ॥ ૪૮૬॥

ગઙ્ગા સતતનૈર્મલ્યા મનોનૈર્મલ્યસઙ્ગતા ।
ત્રૈલોક્યાતીતસૌરૂપા ત્રિગુણાતીતસૌખ્યદા ॥ ૪૮૭॥

કલિકલ્મષનાશા ચ કલ્યાર્તિશમનાવહા ।
કલિપુણ્યકરા ગઙ્ગા કલિશોકનિવારિણી ॥ ૪૮૮॥

કલિમાનવસુશ્રાયા કારુણ્યૌઘપરીવહા ।
કલિદોષનિવારા ચ કલિપ્રત્યક્ષદેવતા ॥ ૪૮૯॥

કલાધરા કલાધારા કલિકાલુષ્યહારિણી ।
કલહંસા કલાભાસા કલાધરમહાદ્યુતિઃ ॥ ૪૯૦॥

કાલભીત્યપહા ગઙ્ગા કાલાન્તકપ્રિયા કલા ।
કાલી કનકધારા ચ કાલકાલાભિષેકકા ॥ ૪૯૧॥

હિમશૃઙ્ગોદ્ભવા ગઙ્ગા હિમોત્સઙ્ગપ્રવાહિણી ।
હિમોપશલ્યવાહા ચ સમભૂબહુદૂરગા ॥ ૪૯૨॥

હરિદ્વારા પ્રયાગા ચ કાશીકલુષહારિણી ।
પ્રાચ્યવઙ્ગાગતા ગઙ્ગા સમુદ્રપ્રતિગામિની ॥ ૪૯૩॥

લોકકૂપનિમગ્નાનાં ચિત્તાગોચરજ્ઞાનિની ।
વિરક્તાસક્તભક્તાનાં ચિત્તગોચરજ્ઞાનિની ॥ ૪૯૪॥

પરાહ્લાદા પરંહંસા શ્રીરામકૃષ્ણસેવિતા ।
બ્રહ્મનિષ્ઠાતિતુષ્ટિશ્ચ તુષ્ટિવૃંહણમાવરા ॥ ૪૯૫॥

શ્રીરામકૃષ્ણસદ્ધ્યાનપારા ગઙ્ગા પરાવરા ।
પરબ્રહ્મપયોરૂપા પારાવારપરાયણા ॥ ૪૯૬॥

શ્રીરામકૃષ્ણનિધ્યાતકાલી ગઙ્ગા કલારવા ।
શ્રીરામકૃષ્ણસાન્નિધ્યપરાયણપરાપરા ॥ ૪૯૭॥

સુકુમારી પ્રવૃદ્ધા ચ પ્રવૃદ્ધશ્રીમતી ધની ।
સૌલભ્યા દુર્લભા દિવ્યા દુર્ગા દુર્ગનિવારિણી ॥ ૪૯૮॥

સાગરાપારવૈશાલ્યા ગઙ્ગાસાગરસઙ્ગમા ।
બહુસ્રોતઃપ્રવાહા ચ ધાસસી સાગરાયુતા ॥ ૪૯૯॥

બહ્વાસરજલાદુગ્ધા ભયાનકહિમાપગા ।
ગઙ્ગા ભઙ્ગનયા માતા ભયાપોહા ભવાપહા ॥ ૫૦૦॥

આહ્લાદકારિણી ગૌરી કાલી ઘોરા સુરૂપિણી ।
હૂગ્લી પદ્મા સુનામ્ની ચ મેઘના સાગરાયુતા ॥ ૫૦૧॥

સિન્ધુપર્યાયપાયૌઘા સિન્ધુવૈશાલ્યલાસિની ।
સિન્ધુજાહ્લાદભઙ્ગી ચ હ્લાદિની સિન્ધુગામિની ॥ ૫૦૨॥

ગઙ્ગા ગગનસિન્ધુશ્ચ રસવાહા રસાર્ણવા ।
અગનાગગલાસારા વગલાભરણાપગા ॥ ૫૦૩॥

અગવાહા અધોવાહા સમવાહા સમુદ્રગા ।
આઘૂર્ણા અતિચણ્ડા ચ શમવાહા તરઙ્ગિણી ॥ ૫૦૪॥

મહીધરમહાપ્લાવા સમભૂમિપરીવહા ।
મહોદધિસમાશ્લિષ્ટા ગઙ્ગાસાગરસંયુતા ॥ ૫૦૫॥

સાગરાભેદમાગઙ્ગા રાગલાસ્યતરઙ્ગિણી ।
સાગરાશ્લિષ્ટસન્તોષા ગઙ્ગા સાગરસઁલ્લયા ॥ ૫૦૬॥

ગોમુખાવતરા ગઙ્ગા ગઙ્ગાસાગરસઙ્ગમા ।
ગોમુખીવ્યક્તરૂપા ચ સાગરાવ્યક્તરૂપિણી ॥ ૫૦૭॥

ધરણીધરસમ્ભાવા ધરણીપ્લવસઙ્ગમા ।
ધરીભૂતસુધાપ્લાવા લવણાબ્ધિસમિશ્રિતા ॥ ૫૦૮॥

કૂવારાભિન્નસમ્મિશ્રા કૂવારભિન્નસજ્જલા ।
કૂવારવારિભાવા ચ વિલાવણ્યાતિમાધુરી ॥ ૫૦૯॥

સાગરાલક્ષ્યરૂપા ચ સાગરાપરરૂપિણી ।
શ્વેતદ્વીપમનોરમ્યા વાર્ષિક્યમેલવિશ્રુતા ॥ ૫૧૦॥

અબ્ધ્યૈકીભૂતકંશ્રેષ્ઠા શ્રેષ્ઠૈકતત્ત્વદર્શિની ।
એકવસ્તુપ્રમાણા ચ એકતથ્યપ્રબોધિની ॥ ૫૧૧॥

અભિધ્યાનચિદાભાસા એકતત્ત્વપ્રકાશિની ।
અભિધ્યાનમનોલીના વ્યક્તૈકવસ્તુરૂપિણી ॥ ૫૧૨॥

એકવસ્તુનદીરૂપા એકવસ્તુજલાશયા ।
એકવસ્તુસ્ફુરાભાસા એકવસ્ત્વપરાલયા ॥ ૫૧૩॥

વ્યક્તાવ્યક્તૈકસદ્વસ્તુતત્ત્વાતિસૂક્ષ્મદર્શિની ।
પરાવરવિભોભુવત્પરબ્રહ્મસ્વરૂપિણી ॥ ૫૧૪॥

અદ્વૈતતત્ત્વવાક્યાર્થા દ્વૈતાદ્વૈતવિશિષ્ટતા ।
જીવબ્રહ્મૈક્યસદ્બોધા સજ્જ્ઞાનસ્ફૂર્તિદીપિની ॥ ૫૧૫॥

સમુદ્રરાજસંયુક્તા ગઙ્ગા મનસ્સમુદ્રગા ।
સમુદ્રરૂપસાન્નિધ્યા સમુદ્રાલયદૈવિકા ॥ ૫૧૬॥

સમુદ્રાભા પયઃપૂરા અબ્ધિવૈશાલ્યગામિની ।
સમુદ્રાઘોગતોદ્ધારા ગઙ્ગાનઘાઘનાશિની ॥ ૫૧૭॥

અવાચ્યાનન્દસમ્પૂર્ણા વાગ્વાસિતા સુવાસિની ।
સર્વકાલસમુલ્લાસા સર્વદા સર્વતોમુખી ॥ ૫૧૮॥

ભવસાગરપારા ચ ભાવાનન્દપ્રકાશિની ।
ભવભાવસુભાવા મા ભાવાભાવવરપ્રદા ॥ ૫૧૯॥

ઇહસાગરતારા ચ પરાનન્દસુમાર્ગિણી ।
ભાવસાગરરાગા ચ રાગાનુરાગસાગરા ॥ ૫૨૦॥

સ્વરસાગરસઙ્ગા ચ સ્વરસાનુવિલીનતા ।
સ્વરસાગરગારાગા સ્વરપુષ્પાર્ચનસ્તુતા ॥ ૫૨૧॥

હિમાદ્રિભાવિતા ગઙ્ગા હિમગા સાગરાલયા ।
વિશાલસાગરાગુપ્તા સાગરશ્રુતિસઁલ્લયા ॥ ૫૨૨॥

હિમાદ્રિવ્યક્તરૂપા ચ અબ્ધિગુપ્તસુરૂપિણી ।
સમુદ્રતીરનિધ્યાતા સ્નાનપાનાતિસત્ફલા ॥ ૫૨૩॥

સમુદ્રરૂપસામીપા નદીરૂપવિદૂરગા ।
નદીનાદાતિદૂરા ચ સમુદ્રસ્વરનર્દના ॥ ૫૨૪॥

હિમશૈલોદ્ભવા ગઙ્ગા સમસાગરસાલયા ।

હિમોદ્ભૂતસ્તુતિસ્તોમસહસ્રાર્પિતસાગરા ॥ ૫૨૫॥

બહુદૂરહિમાપ્લાવા બહુસામીપ્યસાગરા ।
બહ્વીપ્સિતજલા ગઙ્ગા બહુશીઘ્રપ્રસાદિની ॥ ૫૨૬॥

બ્રહ્મૈક્યલીનતત્ત્વા ચ બ્રહ્માનન્દમયાલયા ।
બ્રહ્મલીનતપસ્તીર્થા બ્રહ્મસ્થૂલશરીરકા ॥ ૫૨૭॥

અદ્વિતીયાપરાનન્દા અદ્વિતીયાપમાહિના ।
અધસ્થા હિમશીર્ષસ્થા સમસ્થા સર્વગામિની ॥ ૫૨૮॥

આર્દ્રોપનિષદાસારા આર્દ્રહૃત્સાગરાલયા ।
અદૃશ્યાદૃશ્યરૂપા ચ દૃશ્યાદૃશ્યા સ્તુતિસ્ફુરા ॥ ૫૨૯॥

વેદસારાસુધીસારા હૃત્સ્થિરા મા વરાલયા ।
મોદસારાનદાસારા તત્ત્વરૂપા સમુદ્રગા ॥ ૫૩૦॥

બોધસારાતિસત્સારા રાગરૂપા સ્વરાલયા ।
નાદસારા સુધાસારા ભદ્રરૂપા લયાલયા ॥ ૫૩૧॥

યોગસારા મહાસારા સત્ત્વરૂપા ચિરસ્થિરા ।
રાગસારા જલાસારા સત્યરૂપા શુચિસ્સ્ફુરા ॥ ૫૩૨॥

ઘોરરૂપા સુલાવણ્યા શાન્તિરૂપા શમાવહા ।
સત્સુરૂપાવિરૂપા ચ જ્ઞાનરૂપા સુદર્શના ॥ ૫૩૩॥

માયાસાગરતારા ચ માયાભ્રાન્તસુમાર્ગિણી ।
માયાપાટનિપાટા મા માયાતીતસ્વરૂપિણી ॥ ૫૩૪॥

માયાતીતપ્રશાન્તિશ્ચ માયાદારિદ્ઘૃણાકરી ।
માયામધ્યૈકતથ્યા મા તથ્યોપચારકીર્તિતા ॥ ૫૩૫॥

માયાસ્વપ્નવિનાશા ચ માયાવિકરુણાવહા ।
માયારહિતપુણ્યોદા માયાતત્ત્વપ્રકાશિની ॥ ૫૩૬॥

સત્યવાક્સંસ્થિતા માતા સત્યાસત્યવિભેદિની ।
સત્યા સત્યસુરૂપા ચ સત્ત્વાસત્ત્વપ્રબોધિની ॥ ૫૩૭॥

સત્યજ્ઞાનમયી દેવી મિથ્યાજ્ઞાનાવઘટ્ટના ।
મિથ્યાપારૈકતથ્યા મા તથ્યાનુરાગસંસ્કૃતા ॥ ૫૩૮॥

સ્વીકૃતસ્તુતિતથ્યા ચ તથ્યમાનસપૂરણી ।
સત્યવાક્સ્તુતિસત્યા મા સચ્ચિદાનન્દરૂપિણી ॥ ૫૩૯॥

ભક્તિવાગર્થસત્સારા સંયતાઞ્જલિસન્નુતા ।
સંસ્કૃત્યાધારનાડી ચ ભાવનારાગસમ્મુદા ॥ ૫૪૦॥

શક્તિરૂપા સુસત્ત્વા ચ શક્તિદા શક્તિશાલિની ।
જ્ઞાનાર્થિધ્યાનગમ્યા ચ ગાનાઞ્જલ્યતિમોદિની ॥ ૫૪૧॥

નિષ્કામકર્મસન્તોષા કર્મબન્ધનભેદિની ।
ધર્માર્થકામમોક્ષા ચ નૈષ્કર્મ્યસિદ્ધિદાયિની ॥ ૫૪૨॥

કામમોહાપહા ગઙ્ગા સત્કામકામપૂરણી ।
અકામકામિસત્કામા કાવ્યહૃત્કામકામિની ॥ ૫૪૩॥

ભારતાચારસમ્મિશ્રા કલાધારસુજીવની ।
ભારતામોદગર્વા ચ ભારતી ભારલાઘવા ॥ ૫૪૪॥

નર્મદાસિન્ધુકાવેરીસર્વતીર્થસ્વરૂપિણી ।
સર્વોત્કૃષ્ટશુચિસ્સર્વા સર્વાનન્દસમન્વિતા ॥ ૫૪૫॥

નેત્રાનન્દસુદૃશ્યા મા દર્શનાહ્લાદગામિની ।
શ્રોત્રાનન્દસુગાયા ચ પૂર્ણા પૂર્ણત્વદાયિની ॥ ૫૪૬॥

ક્ષરાન્તસ્થાક્ષરા ગઙ્ગા ક્ષીરધારમનોહરી ।
ક્ષારાબ્ધિસંયુતક્ષીરા ક્ષીરસાગરસાન્નિધા ॥ ૫૪૭॥

ગઙ્ગામાતા નભસ્તીર્થા કાલગત્યૈકસાક્ષિણી ।
વાયુરૂપાપરૂપા ચ સર્વરૂપા મદાહરા ॥ ૫૪૮॥

એકાનેકસુરૂપા ચ જલરૂપધરાઝરા ।
અનેકરૂપસર્વસ્થા જલરૂપસુહૃત્સ્થિરા ॥ ૫૪૯॥

અપર્યાપ્તાનુભૂતિશ્ચ પર્યાપ્તાત્મસુખાવહા ।
સૃષ્ટિપર્યાયવ્યક્તિશ્ચ સૃષ્ટિતત્ત્વપ્રદર્શિની ॥ ૫૫૦॥

સંસારસાગરારાવમધ્યૈકક્ષણનીરવા ।
નીરવારામરામા ચ નીરવોદ્ભવગારવા ॥ ૫૫૧॥

ગોમુખારમ્ભરીતિશ્ચ હિમજા સાગરાયણા ।
ગઙ્ગાસાગરવિશ્રામા ઇહમોક્ષપરાયણા ॥ ૫૫૨॥

ગઙ્ગા મય્યેપ્સિતા માતા મલ્લાલસામનઃસ્થિતા ।
મન્દસ્મિતસમુલ્લાસા મનસ્તોયાલયાલયા ॥ ૫૫૩॥

મદાલમ્બા મદમ્બા ચ મચ્ચિત્તપરિપૂરણી ।
મનોલયાવહા ગઙ્ગા મનઆલયદૈવિકા ॥ ૫૫૪॥

શ્રવણાદ્ભુતનામ્ની ચ મનનાહૂતમાતૃકા ।
સ્વાનુભૂતિસુસઙ્ગીતા સ્વાનુભૂતમદમ્બિકા ॥ ૫૫૫॥

બહુદૂરસ્થિતા ગઙ્ગા લઘુદર્શનભાગ્યદા ।
મૃદુલસ્વરગીતસ્થા મદ્ભાવપરિપૂજિતા ॥ ૫૫૬॥

વાગર્થજાલચેલા ચ વાગર્થધારવાહિની ।
વાક્પુષ્ટિનૃત્યસઙ્ગીતા વાક્તુષ્ટિવરદાયિની ॥ ૫૫૭॥

જ્ઞાનવાગ્જાલવર્ષા ચ ગાનવાગ્વર્ષવાહિની ।
માનસોલ્લાસસદ્દર્શા માનસા માનસસ્તુતા ॥ ૫૫૮॥

શબ્દસુસ્વરમાધુર્યા શબ્દાતિમધુરાવહા ।
શબ્દબ્રહ્મમયી દેવી સુશબ્દસ્તોમમાતૃકા ॥ ૫૫૯॥

શબ્દાક્ષરવિલીના મા શબ્દસુસ્વરસઁલ્લયા ।
શબ્દાક્ષરપ્રવાહા ચ સુશબ્દસ્વરસાર્ચિતા ॥ ૫૬૦॥

શબ્દસન્તાપસંહારા શબ્દવ્યથોપશામની ।
શબ્દાવૃત્તિબહિષ્કારા શબ્દજાલવિમોચની ॥ ૫૬૧॥

દુઃશબ્દતાપવિદ્રાવા પ્રત્યહાધ્યાર્તિહારિણી ।
સુષુપ્તિરોધશબ્દાર્તિશામની પ્રશમાવની ॥ ૫૬૨॥

વિરક્તિદાયિની નેત્રી વિરક્તાસક્તિપૂજિતા ।
વિરક્તાસક્તિસુશ્લોકા વિરક્તાસક્તિમાનસા ॥ ૫૬૩॥

રક્તાનુરાગસન્નૂતા રક્તમાનસસુસ્વરા ।
નિઃસઙ્ગાનુતસત્સઙ્ગા નિશાન્તાત્મસુખાવની ॥ ૫૬૪॥

નમ્યા નમસ્કૃતા ગઙ્ગા નતમાનસતોષિણી ।
સુધાગાનસુધાપ્લાવા માતૃગઙ્ગા મનસ્વિની ॥ ૫૬૫॥

સર્વાધિનાશિની દેવી સદ્દુર્વાશીકરાવની ।

નિઃસંશયસ્તુતા ગઙ્ગા સર્વસંશયભેદિની ॥ ૫૬૬॥

સદાનન્દા મુદાવાહા મદાહ્લાદપ્રવાહિણી ।
સદાસ્મરમનોજસ્થા ચિદાનન્દશુભપ્રદા ॥ ૫૬૭॥

જીવૈકલક્ષ્યસદ્બોધા જીવશક્ત્યૈક્યકારિણી ।
જીવતત્ત્વાનુભૂતિશ્ચ જીવસન્નુતિજીવની ॥ ૫૬૮॥

શોષમાનસસંતોષા શોષિતૈકાકિમાનસા ।
મનઃપ્રસત્તિદાત્રી મા પ્રસન્નમનઆલયા ॥ ૫૬૯॥

અભીક્ષ્ણતત્ત્વસંદૃશ્યા અભીષ્ટવરદાયિની ।
અભિક્ષણસ્મૃતાદૃષ્ટા અભીતિત્વપ્રદાયિની ॥ ૫૭૦॥

તમોનિદ્રારિસત્ત્વોદા સત્ત્વાભાસવિકાસિની ।
મનોનૈશ્ચિન્ત્યભાવા ચ ભાવનૈશ્ચલ્યપૂજિતા ॥ ૫૭૧॥

સાધ્વીમનઃસ્થિતા ગઙ્ગા સાધ્વીમનઃસ્થલાવહા ।
સ્વાદુપેયપયઃપૂરા સાધ્વીસ્વાદુફલપ્રદા ॥ ૫૭૨॥

સ્વતન્ત્રા સ્વચ્છરૂપા ચ સ્વતન્ત્રત્વપ્રદાયિની ।
પરતન્ત્રનિવારા ચ પરત્વજ્ઞાનમાર્ગિણી ॥ ૫૭૩॥

વિષાદૌષધપાનીયા રોગશોકનિવારિણી ।
સ્નાનપાનસ્મૃતા ગઙ્ગા શિશિરા તાપહારિણી ॥ ૫૭૪॥

ન્યૂનધીપૂર્ણકારા ચ જ્ઞાનદા રાદ્ધિવૃદ્ધિદા ।
નૂનં ગોપ્ત્રી સુરક્ષા મા નિષ્ઠાપરાભિરક્ષણા ॥ ૫૭૫॥

ભક્તિવૈરાગ્યનિર્માલ્યમાનસોત્સઙ્ગવાહિની ।
ભગવન્નામસદ્ગાનમાનસોલ્લાસવાહિની ॥ ૫૭૬॥

આકાઙ્ક્ષિતહિમસ્પર્શા અતિકાઙ્ક્ષિતકાસુખા ।
સદાન્તઃચક્ષુઆદૃશ્યા બહિર્દર્શનસત્સુખા ॥ ૫૭૭॥

મમકારનકારા મા અહંકારવિદારિણી ।
સર્વોત્કૃષ્ટપ્રશાન્તિશ્ચ શુદ્ધચૈતન્યલીનતા ॥ ૫૭૮॥

ભ્રાન્તિસંહારિણી ગઙ્ગા ભ્રાન્તાશ્રિતાતિસૌભગા ।
શ્રાન્તચિત્તસ્તુતા માતા શ્રાન્તિસંવાહનાપગા ॥ ૫૭૯॥

કામક્રોધહરા ગઙ્ગા લોભમોહવિનાશિની ।
મદમાત્સર્યહા માતા ષટ્શત્રુસૂદની દની ॥ ૫૮૦॥

સુમનોલયવાગ્વાહા મનોમૌનાચલસ્થિતા ।
મૌનાત્મલયસઙ્ગીતા આત્મવિશ્વાસસન્નુતા ॥ ૫૮૧॥

માતા ગઙ્ગા મહાપૂતા મહાપાપપ્રણાશિની ।
મહાવિદ્યાપ્રવાહા ચ મહાપ્રણવનાદિની ॥ ૫૮૨॥

જ્ઞાનમૌનલયા ગઙ્ગા જ્ઞાનાનન્દપ્રવાહિણી ।
ગાનસૌમઙ્ગલાધાત્રી ધ્યાનસત્સ્નાનકાવની ॥ ૫૮૩॥

અજ્ઞાનાપોહના ગઙ્ગા શુદ્ધજ્ઞાનપ્રકાશકા ।
સજ્જ્ઞાનતેજના માતા અદ્વૈતસિદ્ધિદાપરા ॥ ૫૮૪॥

પ્રાતઃસ્મૃતા દિનસ્મૃતા સન્ધ્યાસ્મૃતા સદાસ્મૃતા ।
મનઃસ્નાતેહિતસ્નાના સ્નાનાતિપૂતચિન્તના ॥ ૫૮૫॥

ધ્યાતવ્યાધિકપાવિત્ર્યા ધ્યાનસ્નાનફલાવહા ।
ખ્યાતવ્યા મહિમાનીયા ખ્યાતિદા જ્ઞાનવર્ધિની ॥ ૫૮૬॥

ભવાયનાર્તિસંતાપહારિણી સહચારિણી ।
સદાસહચરી માતા અતિકાઙ્ક્ષાસુપૂરણી ॥ ૫૮૭॥

ઇહજીવનસંત્રાણા પરલોકભયાપહા ।
નિર્વાણનિજસૌખ્યા મા નૈજસ્તોત્રસમર્પિતા ॥ ૫૮૮॥

બહુદૂરપ્રવાહા ચ અવિદૂરા મનશ્ચરા ।
બહુરાગલયાલાસા અતિદૂરાભિવન્દિતા ॥ ૫૮૯॥

યુક્તમાનસસન્નૂતા માનસાયુક્તમાવરા ।
તૃપ્તસુજ્ઞાનસત્કામા નીતસુજ્ઞાનતત્પરા ॥ ૫૯૦॥

સન્માર્ગગામિકા ગઙ્ગા સત્સુખાવહમાતૃકા ।
સૌભાગ્યદાયિની દેવી દિવ્યાનુભવગીતિકા ॥ ૫૯૧॥

માનસાભાસલાસા ચ ભાસમાનજલસ્મિતા ।
પ્રકૃત્યખણ્ડવિસ્તીર્ણા તીર્ણસંસારસાગરા ॥ ૫૯૨॥

રામભક્તગુરુસ્વામિસાક્ષાત્કારપ્રસાદિની ।
ગુરુસત્કીર્તનાવાહા ગુરુસત્ત્વગુણપ્રિયા ॥ ૫૯૩॥

ગુરુગાનસમાહ્લાદા ગુરુકીર્તનસંયુતા ।
ગુરુગાનસુવાગર્થા ગુરુદર્શનસંવરા ॥ ૫૯૪॥

પઞ્ચમીબહુલાગીતદિવ્યનામકૃતિપ્રિયા ।
ગુરુપૂજાસ્થલાપૂતા ગુર્વભિષેકસજ્જલા ॥ ૫૯૫॥

રામનામસુમાધુર્યા વાક્શૈલીશબ્દનાદિની ।
નામાવિરામગાના ચ નાદાન્તર્લયવાહિની ॥ ૫૯૬॥

રામાભિરામરામા ચ ગાનાભિરામરામકા ।
રામનામરમારામા રામારામાવરાપગા ॥ ૫૯૭॥

સુનાદારામરારામા રામનામસુગાનકા ।
સુગાનારામરામા મા નામલાસતરઙ્ગિણી ॥ ૫૯૮॥

વિશ્રામરામગાયા ચ નામવિશ્રામગામિની ।
ગાયવિશ્રામગમ્ભીરા નામગાનવિલાસિની ॥ ૫૯૯॥

રામનામસ્થિરા ગઙ્ગા નામધ્યાનસુમાર્ચિતા ।
હરિનારાયણાનાદનામપુષ્પાર્ચનપ્રિયા ॥ ૬૦૦॥

સુવાગ્રામા સુખારામા ભવારામા ભવાયના ।
સુવાગર્થા સુનાદાર્થા ગાનારામા મનોયના ॥ ૬૦૧॥

મારમારમરામા ચ રામાવિરામરામકા ।
મારવૈરિરમારામા રામારામાવિરામકા ॥ ૬૦૨॥

નતારામા નદારામા નામાભિરામરાગિણી ।
રામનામરસાવાહા નામપેયૂષતોષિણી ॥ ૬૦૩॥

સદાત્મારામનિધ્યાતા ધ્યાનતત્પરગોચરા ।
સદાનન્દપરીવાહા સત્કામિચિત્તહૃત્સ્થિરા ॥ ૬૦૪॥

ગેયરાજસ્તવાવર્ષા ધાન્તથાન્તમયાલયા ।
યાન્તભાન્તનુતા ગઙ્ગા ગુરુવાગ્વર્ષસાલયા ॥ ૬૦૫॥

નાદાસક્તિમનોજીવા જીવશક્ત્યૈકજીવના ।
આધારશ્રુતિજીવા ચ જીવનાધારસુસ્વરા ॥ ૬૦૬॥

સત્યવાગર્ચિતા ગઙ્ગા તથ્યાનુરાગવન્દિતા ।

નિત્યૈકનિયમાગીતા ગીતનામાતિસારગા ॥ ૬૦૭॥

નિત્યાનુષ્ઠાનસુસ્નાનધ્યાનગાનસુપૂજિતા ।
નિત્યમાનસપુષ્પાર્ચા સ્વીકૃતાન્તર્લયાર્ચના ॥ ૬૦૮॥

બ્રાહ્મમુહૂર્તસઙ્ગીતશ્રુતિરાગલયાવહા ।
પ્રાક્સન્ધ્યાસ્મરણાસ્નાતા પ્રાતઃકાલદ્યુતિસ્ફુરા ॥ ૬૦૯॥

નુતિગીતસમષ્ટિસ્થા નુતાનૂતા નુતિપ્રિયા ।
નિત્યનૂતનસત્સ્તોમા નિત્યનૂતનવાગ્વરા ॥ ૬૧૦॥

સત્યાનુભૂતિવાક્સત્ત્વા સત્ત્વાનુભવસારતા ।
સ્વોવશીયસ્તુતિપ્લાવા સ્વપ્રભાસસ્તુતિપ્લવા ॥ ૬૧૧॥

જાતાજાતાપરા ગઙ્ગા પરાનન્દપ્રદાયિની ।
અજાતાનન્દજાતા ચ અજાતત્વપ્રદાયિની ॥ ૬૧૨॥

મયેતિકીર્તિતે ગઙ્ગે અજાતત્વં પ્રદેહિ મે ।
નાહમન્યોપયુક્તામ્બ ત્વદ્ભક્તિકીર્તનં વિના ॥ ૬૧૩॥

ત્વત્પુત્રીકર્મસઞ્ચાયમોચનં શ્રેયસીગતિઃ ।
ત્વત્કર્તવ્યં હિ મન્માતઃ ત્વાં વિના નાસ્તિ મે ગતિઃ ॥ ૬૧૪॥

મદન્તઃસ્ફુરણે દેવિ મજ્જીવનસુજીવનિ ।
મજ્જીવનાઢ્યકર્ત્ર્યમ્બ મદન્તરઙ્ગદેવતે ॥ ૬૧૫॥

મચ્ચિત્તગોમુખારામે મન્મનોહૈમવાહિનિ ।
મદ્ધૃત્સાગરસત્સઙ્ગે મત્પ્રેમામ્બુધિસઙ્ગમે ॥ ૬૧૬॥

શ્રીગઙ્ગાક્ષરપુષ્પાવલી ॥

અગહૈમોદ્ભવા ગઙ્ગા અબ્ધ્યુક્તા મા અધોવહા ।
અન્તારામા અતિસ્તુત્યા અક્ષરાવલિસન્નુતા ॥ ૬૧૭॥

અમ્બા ગઙ્ગા અતિપ્રેષ્ઠા અક્ષરારમ્ભપૂજિતા ।
અક્ષરા અક્ષરાભાસા અક્ષય્યા અચલોદ્ભવા ॥ ૬૧૮॥

અન્તર્મુખી બહિર્વાહા અન્તરાત્મસમિશ્રિતા ।
અન્તઃસ્ફૂર્તિકરા ગઙ્ગા અન્તર્જ્યોતિઃપ્રકાશિની ॥ ૬૧૯॥

અખણ્ડૈકરસાપૂર્ણા અસમાનપ્રભાવખા ।

અપ્રમેયા અજાજર્ણા અક્ષરાવલિમણ્ડિતા ॥ ૬૨૦॥

અખણ્ડાધ્યાતસદ્રૂપા અખણ્ડાનન્દનાદિની ।
અખણ્ડનામસઙ્ગીતા અખણ્ડાનન્દકારિણી ॥ ૬૨૧॥

અખણ્ડાસ્રાવલાવણ્યા અખણ્ડાગીતસુસ્વરા ।
અખણ્ડનાદસદ્ધારા અખણ્ડચણ્ડરંહણા ॥ ૬૨૨॥

અખણ્ડદીપસમ્ભાસા અખણ્ડાસારગાસ્મિતા ।
અખણ્ડમઙ્ગલાશીદા અખણ્ડમાનસસ્તુતા ॥ ૬૨૩॥

અખણ્ડધારસાનન્દા અખણ્ડસ્ફૂર્તિવાહિની ।
અખણ્ડજ્ઞાનશિક્ષા મા અખણ્ડજ્ઞાનદીપિની ॥ ૬૨૪॥

અત્યૂષસ્નાનસાનન્દા અત્યૂષમૃદુગાલયા ।
અત્યૂષજપવર્ણા ચ અત્યૂષસુસ્વરાર્ચિતા ॥ ૬૨૫॥

અશોષકવિતાવાહા અશોષ્યાહ્લાદકાવ્યઝા ।
અનશ્વરાશુગા ગઙ્ગા અત્યાશુકવિસિદ્ધિદા ॥ ૬૨૬॥

અન્તર્લીના મનોરઙ્ગા અન્તર્હ્રીંકારદેવતા ।
અન્તઃસૂક્ષ્મપ્રવાહા ચ અન્તરોંકારનાદિની ॥ ૬૨૭॥

અવિરામકવિસ્તુત્યા અવિરામસુનામગા ।
અવિરામરયારામા અવિરામા મનોરમા ॥ ૬૨૮॥

અક્ષરાન્તસ્થસત્ત્વા મા અક્ષિતા અક્ષિતામૃતા ।
અન્તરાત્મલયા ગઙ્ગા અન્તરાલયદૈવિકા ॥ ૬૨૯॥

આત્મારામારમારામા આત્માનન્દપ્રવાહિણી ।
આત્માનુભૂતિસારા ચ આત્મવિશ્વાસપૂરણી ॥ ૬૩૦॥

આત્મજ્ઞાનાવબોધા મા આસુરીગુણધાવની ।
આપઃસ્વચ્છમનોગમ્યા આત્મીભાવસુભાવના ॥ ૬૩૧॥

આનન્દકન્દમૂલા ચ આદ્યન્તરહિતાહિતા ।
આશાપાશવિનાશા મા આશંસિતા સુશંસિતા ॥ ૬૩૨॥

આયુરારોગ્યદાત્રી મા આમયાર્તિનિવારિણી ।
આદિશક્તિજલાસારા આદિશબ્દપ્રણાદિની ॥ ૬૩૩॥

આહ્લાદનાદવાહા ચ આત્મસઁલ્લીનસુસ્વરા ।
આધારશ્રુતિસત્સારા આપઃસ્વરૂપવિગ્રહા ॥ ૬૩૪॥

ઇષ્ટેષ્ટિપૂરણા ગઙ્ગા ઇહભોગ્યૈકભોગ્યદા ।
ઇલાવાહા સુવર્ગોદા ઇહપ્રત્યક્ષદેવતા ॥ ૬૩૫॥

ઇક્ષુસ્રાવકવિસ્તુત્યા ઇક્ષુસારાતિમાધુરી ।
ઇહસૌખ્યપરાનન્દા ઇહસિદ્ધિપ્રદાયિની ॥ ૬૩૬॥

ઈક્ષણાતિમુદાવાહા ઈશશીર્ષપ્રવાહિણી ।
ઈડાપ્રીતા ચ ઈડેશી ઈશસન્નુતમોહિની ॥ ૬૩૭॥

ઈડાધારસુધાપ્લાવા ઈહિતાનન્દદાયિની ।
ઈહિતશ્લોકસચ્ચાયા ઈહિતશ્લોકપૂરણી ॥ ૬૩૮॥

ઈહાસમ્પરિપૂરા મા ઈહિતારોગ્યતુષ્ટિદા ।
ઈહિતાસારદૃષ્ટિશ્ચ ઈહિતાપ્લાવમજ્જના ॥ ૬૩૯॥

ઉત્પાવનહિમાસારા ઉન્માદનહિમાપ્લવા ।
ઉન્મત્તગર્જનાસારા ઉન્મત્તાસક્તચિત્તગા ॥ ૬૪૦॥

ઉત્તમશ્લોકસઙ્ગીતા ઉત્તમાસક્તિદાયિની ।
ઉત્તમોત્તમસત્તીર્થા ઉત્તમાનુભવસ્તુતા ॥ ૬૪૧॥

ઊર્ધ્વમૂલા અધોવાહા ઊર્ધ્વલોકાવતારિણી ।
ઊર્ધ્વોદ્ગીનોર્મિમાલા ચ ઊર્ધ્વદૃષ્ટિપ્રસાદિની ॥ ૬૪૨॥

ઊષાતિરમણીયા ચ ઊષકસ્નાનનન્દિની ।
ઊષકાધ્યાતસઙ્ગીતા ઊષકસ્તવસેવિતા ॥ ૬૪૩॥

ઋષિસન્નુતમાહાત્મ્યા ઋષિજહ્નુસુપુત્રિકા ।
ઋષિસંવાસપારા ચ ઋષિસઙ્કુલશઙ્કરી ॥ ૬૪૪॥

ઋષભારૂઢમૂર્ધન્યા ઋણાનુબન્ધમોચની ।
ઋદ્ધિદા ઋદ્ધિવાહા ચ ઋતધામ્ની ઋદૂદકા ॥ ૬૪૫॥

એકા એકગુણાસારા એકવાક્સ્તુતિસસ્મિતા ।
એકવસ્તુસ્વરૂપા મા એકતત્ત્વપ્રકાશિની ॥ ૬૪૬॥

એકનિષ્ઠાપરાસ્નાતા એકાનુભવહર્ષિણી ।
એકનિષ્ઠાપરાધ્યાતા એકાનુભવસન્નુતા ॥ ૬૪૭॥

એકાન્તસુસ્વરા ગઙ્ગા એકાન્તમૌનવાહિની ।
એકાન્તમૌનસઙ્ગીતા એકાન્તધ્યાનગોચરા ॥ ૬૪૮॥

એકભક્તિસ્તુતા ગઙ્ગા એકપુત્રીમનોલયા ।
એકાન્તસત્સુસઙ્ગા ચ એકાન્તમાનસાલયા ॥ ૬૪૯॥

એકાકિન્યૈકસન્તોષા એકસન્તોષવાહિની ।
એકસન્તોષવાક્સ્ફૂર્તિઃ એકસન્તોષવાગ્વહા ॥ ૬૫૦॥

ઐકાગ્ર્યસંસ્તુતા દેવી ઐક્યચિત્તસ્તુતિસ્થિરા ।
ઐક્યમાનસસમ્પૂર્ણા ઐક્યહૃત્સન્નિવાસિની ॥ ૬૫૧॥

ઓંકારઘોષણા ગઙ્ગા ઓંકારશ્રુતિગીતિકા ।
ઓંકારસ્રવમાધુર્યા ઓંકારબ્રહ્મરૂપિણી ॥ ૬૫૨॥

ઔષધીરસવાહા ચ ઔત્તરાવાહિની જની ।
ઔપસર્ગિકપાઠા ચ ઔપશ્લેષિકમોદિની ॥ ૬૫૩॥

ઔજસ્યવારિસત્સારા ઔડવાદિસુરાગિણી ।
ઔષસ્યરાગસઙ્ગીતા ઔષસીમૃદુરાગિણી ॥ ૬૫૪॥

કલ્યાણગુણમાહાત્મ્યા કલ્યાણાદ્ભુતસચ્છવિઃ ।
કલ્યાણકવના ગઙ્ગા કલ્યાણકવિતાવરા ॥ ૬૫૫॥

કલિકાકાવ્યસંફુલ્લિઃ કવિમાનસસસ્મિતા ।
કલાલાપતરઙ્ગા ચ કલાલાપનુતિસ્તુતા ॥ ૬૫૬॥

કલિક્લેશિતસુશ્રાયા કલિક્રૂરત્વવારણી ।
કલિરાવપ્રશામ્યા મા કલિતામોદગીતિકા ॥ ૬૫૭॥

કર્મકૌશલસમ્પાદા કર્મસિદ્ધિપ્રસાદિની ।
કર્મબન્ધનવિચ્છિન્ના કર્મનિર્વૃત્તિકારિણી ॥ ૬૫૮॥

કાવ્યાલાપનિનાદા ચ કાવ્યાલઙ્કારમણ્ડિતા ।
કાવ્યોલ્લાસવિલાસા મા કાવ્યાલાપાભિવન્દિતા ॥ ૬૫૯॥

કિરાતિકિરણાભા ચ કિરણાવલિશોભિતા ।
કિઙ્કિરાતસુગાપારા કિલાકિલજટોદકા ॥ ૬૬૦॥

કિશોરી કીર્તિતા ગઙ્ગા કીર્તનાધારસુશ્રુતિઃ ।

કીલાલપાવના પુણ્યા કીલાલલાસસદ્યુતિઃ ॥ ૬૬૧॥

કુટિલાલકકલ્લોલા કુન્દસ્મિતતરઙ્ગિણી ।
કુઞ્ચિતાદ્રિદરીવાહા કુઙ્કુમાઙ્કિતરઙ્ગિણી ॥ ૬૬૨॥

કૂહાવૃતા ઉષોરમ્યા કૂલંધયગૃહસ્પૃહા ।
કૂલંકષપ્રવાહા ચ કૂપસ્નાતાતિકાઙ્ક્ષિતા ॥ ૬૬૩॥

કૃતિરાજગુરુસ્તોમકૃતિવાહપ્રવાહિણી ।
કૃત્યૌઘાનુદિનાગીતા કૃત્યૌઘગુરુવાક્સ્થિરા ॥ ૬૬૪॥

કૃત્યાકૃત્યોપદેશા મા કૃચ્છ્રવાહા કૃપાવહા ।
કૃપણોદ્ધારણા ગઙ્ગા કૃતાપરાધધાવની ॥ ૬૬૫॥

કૃશનાભતરઙ્ગા ચ કૃષ્ણાગકૃશનસ્મિતા ।
કૃષ્ણવાગમૃતા ગઙ્ગા કૃષ્ણા કૃષ્ણસ્વરૂપિણી ॥ ૬૬૬॥

કેદારનાથમૌલિસ્થા કેદારોત્તુઙ્ગવાહિની ।
કેદારલિઙ્ગસંસેકા કેવલજ્ઞાનદાયિની ॥ ૬૬૭॥

કૈરવીરવિભાસા ચ કૈવલ્યસિદ્ધિદાયિની ।
કૈટભારિનુતા ગઙ્ગા કૈલાસનાથમોદિની ॥ ૬૬૮॥

કોપતાપાતિદૂરા ચ કોકિલાકૂજકૂલભૂઃ ।
કોલાહલહલા ગઙ્ગા કોમલાઙ્કિતકોમલા ॥ ૬૬૯॥

કૌવેરીમોદશુક્લાભા કૌશલાવહગઙ્ગિકા ।
કૌમુદીકૌશસમ્ભાસા કૌશેયોલ્લોલલોટના ॥ ૬૭૦॥

કૌશલ્યાસુતસન્નૂતા કૌશેયગેયસંસ્થિતા ।
કૌસ્તુભાઙ્કિતપાદોદા કૌતુકાઙ્કિતસત્સ્તવા ॥ ૬૭૧॥

ક્રતુદાત્રી ક્રતુપ્રીતા ક્રાન્તિગા મા ક્રમાવહા ।
ક્રિયાયોગસ્થિતાનૂતા ક્રીડાસ્થલહિમાલયા ॥ ૬૭૨॥

ક્રૂરસંસારપારા ચ ક્રોધાઘારાતિસૂદની ।
ક્રોડીકૃતૈકપુત્રી મા ક્લાન્તિસંવાહસંવરા ॥ ૬૭૩॥

ક્લિષ્ટસાધ્યલઘૂત્થાના ક્લેશક્લોશપ્રણાશિની ।
ક્વણદ્વીણાસુવાણી ચ ક્ષણાયાપિ ન વિસ્મૃતા ॥ ૬૭૪॥

ક્ષણિનીક્ષણિકાભાસા ક્ષરાક્ષરા ક્ષિતિક્ષરા ।
ક્ષણક્ષિપ્રસ્રવા ગઙ્ગા ક્ષમા ક્ષમાન્યરૂપિણી ॥ ૬૭૫॥

ક્ષાલિતાશ્રિતપાપા ચ ક્ષામ્યભક્તાશ્રિતાવની ।
ક્ષારક્ષરસુરૂપા ચ ક્ષામસઞ્જીવની વની ॥ ૬૭૬॥

ક્ષિતિજાપૂજિતા ક્ષિપ્રા ક્ષિપ્રપ્રવાહમોહિની ।
ક્ષિત્યાગતસુરાપ્લાવા ક્ષિપ્રોદ્ધારણમાહિના ॥ ૬૭૭॥

ક્ષીણભક્તાઘકાત્સ્ન્ર્યા ચ ક્ષીણજન્મૌઘવારણી ।
ક્ષીરાબ્ધિકન્યકાનૂતા ક્ષીરોર્મિસ્વાગતસ્મિતા ॥ ૬૭૮॥

ક્ષુદ્રતાપોહના ગઙ્ગા ક્ષુબ્ધમાનસશામની ।
ક્ષુબ્ધાર્ણવપ્રવાહા ચ ક્ષુભિતોલ્લોલધાવની ॥ ૬૭૯॥

ક્ષેમ્યા ક્ષેમંકરા માતા ક્ષેત્રેશી ક્ષેત્રપાવની ।
ક્ષૌણિભૃત્સમ્ભવા ગઙ્ગા ક્ષૌણિપ્રાચીરસઙ્ગમા ॥ ૬૮૦॥

ક્ષૌમસમ્મૃદુવાચા મા ક્ષૌમવાક્સમ્પ્રદાયિની ।
ક્ષૌમવાક્સમ્પ્રવાહા ચ ક્ષૌમસમ્ભાસવાર્દરા ॥ ૬૮૧॥

ખંદદા ખાપગા ગઙ્ગા ખાણ્ડવસ્વાદુખાવરા ।
ખિન્નમાનસશામ્યા મા ખેદહા ખ્યાતિદાયિની ॥ ૬૮૨॥

ગગનાવતરા ગઙ્ગા ગમ્ભીરસ્વરઘાંષિણી ।
ગતિતાલસુગાપ્લાવા ગમનાદ્ભુતગાલયા ॥ ૬૮૩॥

ગઙ્ગા હિમાપગા દિવ્યા ગમનારમ્ભગોમુખી ।
ગઙ્ગોત્તરી તપસ્તીર્થા ગભીરદરિવાહિની ॥ ૬૮૪॥

ગઙ્ગાહરિશિલારૂપા ગહનાન્તરઘર્ઘરા ।
ગમનોત્તરકાશી ચ ગતિનિમ્નસુસઙ્ગમા ॥ ૬૮૫॥

ગઙ્ગાભાગીરથીયુક્તગમ્ભીરાલકનન્દભા ।
ગઙ્ગા દેવપ્રયાગા મા ગભીરાર્ચિતરાઘવા ॥ ૬૮૬॥

ગતનિમ્નહૃષીકેશા ગઙ્ગાહરિપદોદકા ।
ગઙ્ગાગતહરિદ્વારા ગગનાગસમાગતા ॥ ૬૮૭॥

ગતિપ્રયાગસુક્ષેત્રા ગઙ્ગાર્કતનયાયુતા ।
ગતમાનવપાપા ચ ગઙ્ગા કાશીપુરાગતા ॥ ૬૮૮॥

ગહનાઘવિનાશા ચ ગત્યુત્તમસુખાવની ।
ગતિકાલીનિવાસા ચ ગઙ્ગાસાગરસઙ્ગતા ॥ ૬૮૯॥

ગઙ્ગા હિમસમાવાહા ગમ્ભીરનિધિસાલયા ।
ગદ્યપદ્યનુતાગીતા ગદ્યપદ્યપ્રવાહિણી ॥ ૬૯૦॥

ગાનપુષ્પાર્ચિતા ગઙ્ગા ગાહિતાગહ્વગહ્વરા ।
ગાયગામ્ભીર્યમાધુર્યા ગાયમાધુર્યવાગ્વરા ॥ ૬૯૧॥

ગિરીશકટકાવાહા ગિરિજા ગિરિનન્દિની ।
ગિરીશચ્છવિવાહા ચ ગિરિદર્શિતગાન્દિની ॥ ૬૯૨॥

ગીતાચાર્યસ્વરૂપા ચ ગીતાસારસરિદ્વરા ।
ગીતવાદ્યસ્તુતા ગઙ્ગા ગીતવાદ્યશ્રુતિસ્રવા ॥ ૬૯૩॥

ગુણસત્ત્વપ્રકાશા મા ગુણાતીતસ્વરૂપિણી ।
ગુણસત્ત્વપ્રસાદામ્બા ગુણાતીતપ્રસાન્ત્વિની ॥ ૬૯૪॥

ગુપ્તપ્રવાહમૂલા ચ ગૂઢોત્મતીર્થરૂપિણી ।
ગૃહપૂજનગેયસ્થા ગૈરિકી ગોમુખોદ્ભવા ॥ ૬૯૫॥

ગૌરીગુરુઝરાસારા ગૌરીગુરુઝટાસરા ।
ગૌરીગુરુગુહાધ્યાતા ગૌરા ગૌરાંશુગૌરભા ॥ ૬૯૬॥

ગ્રન્થમૂલા ચ સુપ્રાણા ગ્રન્થિતાક્ષરમાલિની ।
ગ્રન્થાર્થભાવપુષ્ટિશ્ચ ગ્રન્થશ્ચ ગ્રન્થદેવતા ॥ ૬૯૭॥

ગ્રહદોષનિવારા ચ ગ્રહણાદ્યન્તગાહિતા ।
ગ્રાવધાવાલુટન્તી ચ ગ્રાવહૈમપ્રવાહિણી ॥ ૬૯૮॥

ગ્રીષ્મસ્નાનાતિસૌખ્યા ચ ગ્રીષ્મતાપપ્રશામની ।
ગ્રીષ્મક્ષરાતિશીતા ચ ગ્લાનિક્ષાલનજીવના ॥ ૬૯૯॥

ઘટનાપરિપૂર્ણા ચ ઘનાઘનૌઘવાહિની ।
ઘનવૃષ્ટ્યુત્પ્લવોર્મિશ્ચ ઘનૌઘમધ્યઘર્ઘરી ॥ ૭૦૦॥

ઘારશીતોર્મિઘૂર્ણિશ્ચ ઘૃતદીપસ્ફુરદ્ધૃતા ।
ઘોરસંસારનિસ્તારા ઘોરાઘઘનઘાતિની ॥ ૭૦૧॥

ચણ્ડવેલાપ્લવા ગઙ્ગા ચણ્ડમારુતડીનકા ।

ચણ્ડભાસ્કરતાપઘ્ની ચન્દ્રિમાચારુલાસકા ॥ ૭૦૨॥

ચાપલ્યાઙ્કિતવેલા ચ ચાપલ્યનિગ્રહધૃતિઃ ।
ચારુચિત્રપ્રવાહા ચ ચારુસારાતિસુસ્વરા ॥ ૭૦૩॥

ચિન્તિતાર્ચિતપૂર્ણા મા ચિન્તનાપરિપૂરણી ।
ચિરસ્થાયિસુતીર્થા ચ ચિરસ્થાયિસુખાવની ॥ ૭૦૪॥

ચિન્તનાપૂરસાકલ્યા ચિન્તનાર્ચનપૂજના ।
ચિન્તનાદૂરવૈશિષ્ટ્યા ચિત્તશુદ્ધિપ્રસાદિની ॥ ૭૦૫॥

ચિન્તનાપારદૂરા ચ ચિત્તાતિદૂરવાઞ્છિતા ।
ચિન્તનાસારગઙ્ગાકા ચિત્તાવિદૂરમાતૃકા ॥ ૭૦૬॥

ચીર્ણનામાવલીપૂજ્યા ચોદિતશ્લોકપૂજિતા ।
ચૈતન્યબ્રહ્મકંરૂપા ચૌક્ષાલાપકવિસ્તુતા ॥ ૭૦૭॥

છપ્રવાહચ્છવિચ્છન્દ્રા છન્દ્રાન્તશ્છન્દ્રસચ્છવિઃ ।
છન્દસ્કૃતકવિસ્તુત્યા છન્દસ્યકવિતાલયા ॥ ૭૦૮॥

છાયામણ્ડલસંવૃત્તા છાયાર્કસંલસત્પ્રભા ।
છાયાચ્છાયાલસદ્વીચિશ્છાયાસૂનુવ્યથાપહા ॥ ૭૦૯॥

છિદ્રહૃચ્છામના ગઙ્ગા છિદ્રાન્વિતસ્તુતિસ્તુતા ।
છુરિતાક્ષરમાલા ચ છુરિતાસક્તિમાનસા ॥ ૭૧૦॥

જલેશશાયિપાદૌઘા જલેશગજલાષકા ।
જગદુદ્ધારણા ગઙ્ગા જગદાનન્દકારકા ॥ ૭૧૧॥

જલદૈવિકપુણ્યા ચ જન્મમૃત્યુનિવારિણી ।
જલૌષધ્યમૃતાસારા જલચોદિતમજ્જપા ॥ ૭૧૨॥

જપ્તનામાતિસારા ચ જપયોગસુસાધના ।
જલ્પેશી જવની ગઙ્ગા જહ્નુકન્યા ચ જાહ્નવી ॥ ૭૧૩॥

જાગ્રત્સ્વપ્નપ્રસક્તિશ્ચ જાડ્યાપોહનજાઙ્ગલી ।
જાપસારજલાસારા જાલસંસારમોચની ॥ ૭૧૪॥

જિતમાનસવાસા ચ જિજ્ઞાસુશ્રાયગઙ્ગિકા ।
જિહ્વરાજિતસન્નામ્ની જિહ્વપાવનતીર્થકા ॥ ૭૧૫॥

જીવસ્ફૂર્તિસમાખ્યાતા જીવસ્ફૂર્તિસુજીવના ।
જીવસ્ફુરત્સ્તુતિસ્ફૂર્તિસ્ફુરજ્જીવસ્ફુરદ્રસા ॥ ૭૧૬ ॥

જીવશ્લોકસુજીવા ચ જીવન્મુક્તિકરાવની ।
જીવન્મુક્તપનુસ્તોત્રજીવતત્ત્વાર્થરૂપિણી ॥ ૭૧૭ ॥

જુષ્યા જૂર્ણિમતી ગઙ્ગા જૂર્ણિપ્રવાહમોહિની ।
જૂર્ણિભક્તવરાદાત્રી જૂર્ણિશ્લોકવરાલયા ॥ ૭૧૮ ॥

જોટિઙ્ગાહૂતગઙ્ગાકા જોટિઙ્ગવ્રતપૂરણી ।
જોટિઙ્ગજૂટવાહા ચ જોષિકાશ્લોકપૂજિતા ॥ ૭૧૯ ॥

જ્વરવેગજલાષા ચ જ્વરસંસારરોગહા ।
જ્વાલસજ્જ્ઞાનતેજસ્કયોગિવૃન્દાભિવન્દિતા ॥ ૭૨૦ ॥

જ્ઞાતવ્યા જ્ઞપ્તિકીર્તવ્યા જ્ઞાનદા જ્ઞાનિકીર્તિતા ।
જ્ઞાનજ્યોતિઃપ્રકાશામ્બા જ્ઞાનમોક્ષપ્રદાયિની ॥ ૭૨૦ ॥ (extended)

ઝઙ્કારશ્રુતિગમ્ભીરા ઝઙ્કારિણી ઝરી ધરી ।
ઝાઙ્કૃતાપાતવેગા ચ ઝઞ્ઝાનિલાતિઘૂર્ણના ॥ ૭૨૧ ॥

ટઙ્કાત્યદ્ભુતરીતિશ્ચ ઠક્કુરાકૃતિપૂજિતા ।
ડમર્વાનાદશીર્ષસ્થા ઢૌકનશ્લોકવન્દિતા ॥ ૭૨૨ ॥

તક્ષિતોપલશિલ્પા ચ તક્ષિતશ્લોકવિગ્રહા ।
તટિનીતન્તુરૂપા ચ તન્ત્રીસ્વરલયાનુતા ॥ ૭૨૩ ॥

તપસ્તીર્થા તપોપાન્તા તપોવર્ધનવર્ત્મના ।
તપોલીનમનોલીના તપઃપુણ્યફલાવહા ॥ ૭૨૪ ॥

તત્ત્વોપદેશસારા ચ તદ્વસ્તુવ્યક્તરૂપિણી ।
તત્ત્વાર્થબોધકારા મા તત્ત્વજ્ઞાનસ્વરૂપિણી ॥ ૭૨૫ ॥

તાપત્રયાગ્નિશામ્યા ચ તાપસાશ્રયતામરા ।
તાપિતૈકાશયા ગઙ્ગા તાપસાર્તિનિવારિણી ॥ ૭૨૬ ॥

તિતીર્ષ્વાશ્રિતસત્તીર્થા તીર્થતીર્ણભવાર્ણવા ।
તુઙ્ગહૈમાદ્રિગઙ્ગાકા તુઙ્ગકોલાહલોર્મિકા ॥ ૭૨૭ ॥

તૂષ્ણીંકારતુષારૌઘા તૂષ્ણીકતુહિનાલયા ।
તૂર્ણિરીતિરસાપ્લાવા તૂર્ણિગઙ્ગોત્તરીપ્લવા ॥ ૭૨૮ ॥

તૃષિતાત્યૂષગાહા ચ તૃષિતાદ્ભુતતાવિષી ।
તૃષાલુમાનસાહૂતા તૃષાલુમનઆગતા ॥ ૭૨૯ ॥

તેજસ્કરી સુતેજા ચ તૈર્થિકસ્થલશોભના ।
તોયરૂપા ચ તૌષારા તૌષારાદ્રિવિહારિણી ॥ ૭૩૦ ॥

ત્યક્તષડ્દોષવાગ્વાહા ત્યાગરાજકૃતિસ્થિરા ।
ત્યાગરાજગુરુસ્વામિસત્કીર્તનપ્રવાહિણી ॥ ૭૩૧ ॥

ત્રસનોપશમા ગઙ્ગા ત્રાસાપોહજલૌષધી ।
ત્રાત્રી ત્રિલોકપૂજ્યા મા ત્રિગુણાતીતરૂપિણી ॥ ૭૩૧ ॥ (extended)

ત્રિવિધાસારધારા ચ ત્રુટિમપિ ન મન્દગા ।
ત્રૈકાલ્યસ્નાનપુણ્યા ચ ત્રૈલોક્યાતીતમાહિના ॥ ૭૩૨ ॥

દશરાત્ર્યોત્સવા ગઙ્ગા દશાશુભકરી હરી ।
દહરાકાશનિધ્યાતા દહરાકાશદીપિની ॥ ૭૩૩ ॥

દારુણાચારુધારા ચ દાર્દુરસ્વાદુભોગ્યતા ।
દાન્તાહંકારદર્પા ચ દાન્તમાનસવાસિની ॥ ૭૩૪ ॥

દિવ્યા દિવ્યામ્બુસત્સૌખ્યા દિવ્યાનુભવહર્ષદા ।
દિવ્યવાક્સૌષ્ઠવાદાત્રી દિવ્યાનુભવસંસ્તુતા ॥ ૭૩૫ ॥

દિવ્યકીલાલસૌમ્યા ચ દિવ્યનામાતિમોદિની ।
દિવ્યસઙ્કીર્તનાવાહા દિવ્યદૃષ્ટિપ્રદાસુદા ॥ ૭૩૬ ॥

દિનરાત્રિસ્મૃતા ગઙ્ગા દિનાદ્યન્તાવગાહિતા ।
દિનરાડ્રશ્મિહીરાભા દીનાર્તિભઞ્જની જની ॥ ૭૩૭ ॥

દીપાવલિશુભસ્નાતા દીપજ્યોતિર્લસત્સલા ।
દીપસઙ્કુલસમ્ભાસા દીપારતિસુપૂજિતા ॥ ૭૩૮ ॥

દુઃખશોકપરિત્રાણા દુગ્ધૌઘદૃષ્ટિપૂરણી ।
દૂરીકૃતાઘસઙ્ઘાતા દૃષ્ટિપ્રસાદમોચની ॥ ૭૩૯ ॥

દૃઢનિશ્ચયસંગાહા દૃઢભક્તિપ્રસાદિની ।
દૃઢશક્તિપ્રદા ગઙ્ગા દૃષ્ટમાત્રપ્રહર્ષિણી ॥ ૭૪૦ ॥

દેવલોકાવતારા મા દેવભૂમિહિમાલયા ।

દેહારોગ્યમનસ્તુષ્ટિધીતિદા દૈવગઙ્ગિકા ॥ ૭૪૧॥

દોષક્લેશાદિધાવા ચ દૌર્બલ્યાપહમાવરા ।
ધુનદી ધુતિરૂપા ચ ધોતિતાસક્તમાનસા ॥ ૭૪૨॥

દ્રવરૂપપરૈકા ચ દ્રાવિતાશ્રિતકલ્મષા ।
દ્રુતપ્રવાહરીતિશ્ચ દ્રોણીસાધુપ્રસર્પિણી ॥ ૭૪૩॥

દ્વન્દ્વાતીતસુખાવાહા દ્વન્દ્વાતીતસુખાવહા ।
દ્વારિકાપનદીરૂપા દ્વિકરેહપરાર્થદા ॥ ૭૪૪॥

દ્વીપૈકાન્તસુખાવાહા દ્વૈતાદ્વૈતપ્રબોધિની ।
દ્વૈધીભાવાપનેત્રી ચ દ્વૈપપ્રશાન્તિદાયિની ॥ ૭૪૫॥

ધરણીધરધારા ચ ધરણીપ્લવસંયુતા ।
ધરુણી ધવલાસારા ધવાણકગતિપ્લવા ॥ ૭૪૬॥

ધિષણાવસના ગઙ્ગા ધિષ્ણ્યા ચ ધીતિવર્ધિની ।
ધીશક્તિસુપ્રસાદા ચ ધીરતાવર્ધિની ધુની ॥ ૭૪૭॥

ધીરસુસ્વરગામ્ભીર્યા ધૂપદીપાદિપૂજિતા ।
ધૂપિતાશ્રિતમાગઙ્ગા ધૂમાવૃતવિભાતભા ॥ ૭૪૮॥

ધૃતાત્મમાનસાધ્યાતા ધૃત્યવશ્યકરપ્લવા ।
ધૈયેદંશ્લોકસમ્પૂર્ણા ધૈર્યધૈવત્યકારિણી ॥ ૭૪૯॥

ધોરણીશ્લોકસઙ્ગીતા ધૌતસદ્ભક્તમાનસા ।
ધૌતપ્રવાહધૌતી ચ ધૌતભક્તાઘમણ્ડલા ॥ ૭૫૦॥

ધ્યાતવ્યા ધ્યાનગમ્યા મા ધ્યાતા ધ્યાનાભિવર્ધિની ।
ધ્યાનારિધ્વંસના ગઙ્ગા ધ્યાનમાનસગોચરા ॥ ૭૫૧॥

ધ્યાતપ્રવાહરીતિશ્ચ ધ્યાતપ્રશાન્તિસંવરા ।
ધ્યાનવર્ધનશાન્તિશ્ચ ધ્યાનસઁલ્લીનસાલયા ॥ ૭૫૨॥

ધ્રુવસિદ્ધિપ્રદા ગઙ્ગા ધ્વસ્તરાજસતામસા ।
ધ્વનિતોંકારવાહા ચ ધ્વાન્તમાનસદીપિકા ॥ ૭૫૩॥

નદિશ્લોકા નદીશ્રેષ્ઠા નદત્પ્રાણવસારગા ।
નતાઘનાશના ગઙ્ગા નતાનૂતા નદાશ્રિતા ॥ ૭૫૪॥

નમસ્યુનમસા ગઙ્ગા નરકપ્રતિકારખા ।
નવનવ્યસુખા ગઙ્ગા નવગ્રહકૃતાપહા ॥ ૭૫૫॥

નવનવ્યસુરીતિશ્ચ નવનવ્યસુજીવના ।
નવનવ્યકૃતિસ્તુત્યા નવજીવનજીવની ॥ ૭૫૬॥

નષ્ટશોકા નવાદૃશ્યા નશ્વરાતીતસૌખ્યદા ।
નષ્ટલોભાદિદોષા ચ નશ્વરાન્તરનશ્વરા ॥ ૭૫૭॥

નાકાપગા નદીપુણ્યા નાગશાયિપદોદકા ।
નાગરોજ્જીવનાલોકા નાગરીદિવ્યવિગ્રહા ॥ ૭૫૮॥

નાનારસનટોલ્લોલા નાનાધ્વનિનદત્સલા ।
નાનાર્થવાગ્રસાવાહા નાનાભાવનમસ્કૃતા ॥ ૭૫૯॥

નાભીહૃત્કણ્ઠજિહ્વોત્થનાદપ્રવાહઘાંષિણી ।
નામગાનનદાસારા નાદસારરસાપ્લવા ॥ ૭૬૦॥

નાદસુસ્વરનામ્ની ચ નાદિતોંકારવિગ્રહા ।
નારદાસઙ્ગસઙ્ગીતા નાદોપાસનવન્દિતા ॥ ૭૬૧॥

નિતરાં ભાવિતા ગઙ્ગા નિત્યનૂતનલક્ષણા ।
નિત્યનિર્મલનીરા ચ નિત્યસૌમઙ્ગલાવહા ॥ ૭૬૨॥

નિત્યાનિત્યબુધાના મા નિત્યત્વરાજમાર્ગિણી ।
નિર્વાણફલમાહાત્મ્યા નિર્વાણજ્ઞાનમાર્ગિણી ॥ ૭૬૩॥

નિરન્તરસુખાવાહા નિરન્તરસુખાવહા ।
નિરન્તરત્વસદ્રૂપા નિરન્તરરસાસ્પદા ॥ ૭૬૪॥

નિરસ્તકર્મબન્ધા ચ નિર્યાપિતાશ્રિતામયા ।
નિર્ઘાતશબ્દસાદ્રાવા નિર્વાતગહ્વરાલયા ॥ ૭૬૫॥

નિર્મલા નિર્મલાકારા નિર્મલાકારમાનસા ।
નિર્મલાનન્દસત્સારા નિર્મલાનન્દમાનસા ॥ ૭૬૬॥

નિર્મલાકાશશોભા ચ નિર્મલાકાશનીલકા ।
નીલનિર્મલકાચાભા નીરાભાસચિદાત્મિકા ॥ ૭૬૭॥

નીરપૂતસુવૈશિષ્ટ્યા નીરપૂતાસુવાક્સ્થિરા ।
નીરનૈર્મલ્યરૂપા ચ નિત્યનૈર્મલ્યસાઙ્કિતા ॥ ૭૬૮॥

નીરનીલપ્રદોષાભા નીરનીરાજનપ્રભા ।
નીહારવાસ્તવારમ્યા નીહારમયગોમુખી ॥ ૭૬૯॥

નુતિશ્લોકસ્થિતા ગઙ્ગા નૂતનશ્લોકવન્દિતા ।
નૃત્યગેયતરઙ્ગા ચ નેત્રી નેત્રોત્સવોત્પ્લવા ॥ ૭૭૦॥

નૈગમાગમસારા ચ નૈભત્યશ્લોકવન્દિતા ।
નૈસર્ગિકાતિનૈર્મલ્યા નૈઃશ્રેયસી ચ નૈષ્ઠ્યદા ॥ ૭૭૧॥

પરાનન્દાપરાર્થા મા પરલોકભયાપહા ।
પદ્યગદ્યપદાર્થા ચ પદ્યગદ્યપદાસરા ॥ ૭૭૨॥

પાત્રપૂજિતપાવિત્ર્યા પાયૌઘાલયહૃત્સ્થલા ।
પાર્વતદ્યુતિમાલા ચ પારમાર્થિકસૌખ્યદા ॥ ૭૭૩॥

પિણ્ડલાહ્લાદસંદર્શા પીનપ્રવાહહર્ષિણી ।
પુષ્પાર્ચિતાતિપુણ્યા ચ પૂતમાનસપૂજિતા ॥ ૭૭૪॥

પૂતવાઙ્માનસાપૂતા પૂતવાગ્ધારધાવની ।
પૂતોપાન્તાપ્લવાપૂતા પૂતપૂતપ્લવાપ્લુતા ॥ ૭૭૫॥

પૃથુકીર્તિપ્રદા ગઙ્ગા પેયૂષતોયવાહિની ।
પોતના પૌર્ણમીભાસા પ્યાયિતાપ્લાવભાસુરા ॥ ૭૭૬॥

પ્યાયિતાપ્લાવિકા ગઙ્ગા પ્રચોદિતનુતિપ્લવા ।
પ્રણવાપ્લાવસારા ચ પ્રણતિસ્તુતિનન્દિની ॥ ૭૭૭॥

પ્રસાદસલિલાહ્લાદા પ્રસાદપ્રશમાલયા ।
પ્રસાદસ્ફૂર્તિસચ્છ્લોકા પ્રસાદશુભસત્ફલા ॥ ૭૭૮॥

પ્રસન્નચિત્તસદ્ધારા પ્રસત્તિસ્ફૂર્તિચેતસા ।
પ્રસન્ના પ્રશમા ગઙ્ગા પ્રસક્ત્યાસક્તિપૂજિતા ॥ ૭૭૯॥

પ્રાક્સન્ધ્યાપ્રશમાપૂરા પ્રાણપૂરિતસજ્જલા ।
પ્રાણદાત્રી કવિપ્રાણા પ્રાશુગા પ્રાંશુશૈલભા ॥ ૭૮૦॥

પ્રાણબીજહિમાસારા પ્રાસાદહૈમશેખરા ।
પ્રાસાનુપ્રાસસંભાસા પ્રાસાદશ્લોકસઞ્ચયા ॥ ૭૮૧॥

પ્રિયમાનસપૂજાર્ચા પ્રીણનસ્વાદુતીર્થકા ।

પ્રેઙ્ખોલોલ્લોલલાવણ્યા પ્રેરિતશ્લોકગીતિકા ॥ ૭૮૨॥

પ્રોન્મીલશ્લોકપુષ્પા ચ પ્રોન્મૂલિતાઘભૂરુહા ।
પ્રોલ્લાઘિતદૃઢીકર્ત્રી પ્રૌઢીભૂતકવિપ્લવા ॥ ૭૮૩॥

પ્લવારામા પ્લુતારામા પ્લાવિકાશીતસૌખ્યદા ।
પ્લુતીક્ષણક્ષણા ગઙ્ગા પ્લુતોર્મિકાન્ત્યતીતભા ॥ ૭૮૪॥

ફલિતેપ્સિતસિદ્ધિશ્ચ ફુલ્લનામસુમાર્ચિતા ।
ફુફ્ફુસાફુલ્લનાસ્નાના ફેનિલદ્યુતિસસ્મિતા ॥ ૭૮૫॥

બંહિષ્ઠાપઃપ્રમોદા ચ બંહિષ્ઠાસક્તિવન્દિતા ।
બદરીનાથપાદૌઘા બદરીધામમેખલા ॥ ૭૮૬॥

બદ્ધચિત્તનિવાસા ચ બન્ધપાશવિમોચની ।
બલવાહબલાહા ચ બલિષ્ઠા બલદાયિની ॥ ૭૮૭॥

બહુસ્નાતા બહુધ્યાતા બહુલસ્તુતિચોદના ।
બહુલાર્તિહરા ગઙ્ગા બહ્વીપ્સિતમદમ્બિકા ॥ ૭૮૮॥

બહુદૂરપ્રભાવા ચ બહુવેગનદીવરા ।
બહુધારાપ્રવાહા ચ બહુબા બહુકીર્તિતા ॥ ૭૮૯॥

બહુદૂરેપ્સિતા ગઙ્ગા બહુદૂરસ્મૃતાસ્તુતા ।
બહુદૂરમનસ્સ્નાતા બહુદૂરમનઃસ્થિતા ॥ ૭૯૦॥

બહુજન્મકૃતાઘૌઘબહિષ્કરણપાવની ।
બહુકર્મવિનિર્મુક્તિજ્ઞાનમોક્ષસુખાવની ॥ ૭૯૧॥

બાલાપ્લાવવિનોદામ્બા બાલાલાપવિનોદિની ।
બાલાર્કસ્ફુરબા ગઙ્ગા બાહુલચ્છવિમોદિની ॥ ૭૯૨॥

બિભીષણપ્રવાહા ચ બિલહૃત્સ્થલવાસિની ।
બીજબુદ્ધિપ્રસાદા મા બીજાક્ષરનિવાસિની ॥ ૭૯૩॥

બુદ્ધ્યતીતસ્વરૂપા મા બુધસજ્જનતોષિણી ।
બૃહત્પુણ્યાવહા ગઙ્ગા બૃહત્કીર્તિપ્રદાયિની ॥ ૭૯૪॥

બોધનાતીતવાક્શૌર્યા બોધિતસ્વસુકીર્તના ।
બોદ્ધવ્યા બોધરૂપા ચ બોધાતીતસુબોધના ॥ ૭૯૫॥

બ્રહ્માનન્દસ્વરૂપા મા બ્રહ્મવિદ્યાપ્રબોધિની ।
બ્રહ્માનન્દપ્રસાદસ્થા બ્રહ્મૈક્યતત્ત્વબોધિની ॥ ૭૯૬ ॥

બ્રહ્માનુભૂતિસારા ચ બ્રહ્મનિષ્ઠાભિવર્ધિની ।
બ્રહ્માનન્દસુખા ગઙ્ગા બ્રહ્મતેજસ્સુવર્ધિની ॥ ૭૯૭ ॥

બ્રાહ્મમુહૂર્તનિધ્યાતા બ્રાહ્મમુહૂર્તમગ્નતા ।
બ્રાહ્મમુહૂર્તસઙ્ગીતા બ્રાહ્મમુહૂર્તશાન્તતા ॥ ૭૯૮ ॥

ભક્તાવની ભગાવાહા ભક્તિશ્લોકાભિવન્દિતા ।
ભઙ્ગાપનયના ગઙ્ગા ભજનાનન્દવાહિની ॥ ૭૯૯ ॥

ભદ્રવાગ્વસુદા ગઙ્ગા ભણ્ડિમણ્ડિતભણ્ડિલા ।
ભદ્રવાગ્વર્ષવાહા ચ ભદ્રવાગર્થસારતા ॥ ૮૦૦ ॥

ભરિતાદ્ભુતપાનીયા ભર્મરાજિતપુષ્કરા ।
ભવરોગવ્યથાપોહભૈષજ્યસલપુષ્કલા ॥ ૮૦૧ ॥

ભાવાતીતસ્વભાવા મા ભાવપ્રભાવભાવિતા ।
ભાવનાતીતભાવા ચ ભાવનાભાવભાવના ॥ ૮૦૨ ॥

ભાવાનુગનુતિશ્લોકા ભાવભાવગભાવની ।
ભાસમાનાસમાના ચ ભાવભાસનભાસ્વતી ॥ ૮૦૩ ॥

ભિન્નહૃત્ભેષજા ગઙ્ગા ભીષ્મતૃષ્ણાશમાગતા ।
ભીષણાસારભીષ્મા ચ ભીતેહબન્દિમોચની ॥ ૮૦૪ ॥

ભુવનાદ્ભુતપાવિત્ર્યા ભુવનત્રયપાવની ।
ભૂમણ્ડલાગતા દિવ્યા ભૂયો ભૂયો નમસ્કૃતા ॥ ૮૦૫ ॥

ભૃગુસાનુહિમોપાન્તા ભૃતહેમભગીરથી ।
ભૃતશીતોત્તરી ગઙ્ગા ભૃશોદ્વેગપ્રશામની ॥ ૮૦૬ ॥

ભેદિતાધ્યાદિમૂલા ચ ભેરુણ્ડચારુનિર્ઝરી ।
ભૈષજ્યદિવ્યકીલાલા ભૈરવાલયકન્દરી ॥ ૮૦૭ ॥

ભોગભોજિસુવાહૌઘા ભૌવનાભૌવનાવના ।
ભ્રાન્તચિત્તૈક્યકારા ચ ભ્રૂમધ્યૈક્યમનસ્સ્ફુરા ॥ ૮૦૮ ॥

મઙ્ગલ્યસુપ્રવાહા ચ મઙ્ગલ્યવાક્પ્રવાહિણી ।
મઙ્ગલાયનમગ્ના ચ મઙ્ગલાનન્દમાર્ગિણી ॥ ૮૦૯ ॥

મન્યુમાત્સર્યશામ્યા મા મદાદીતરદોષહા ।
મધુગાનવરા ગઙ્ગા મદાધિવ્યાધિનાશિની ॥ ૮૧૦॥

મનોવેગપ્રશામ્યા ચ મનઉદ્વેગવાહિની ।
મનઃક્ષુદ્રાપહા ગઙ્ગા મનઃપક્વકરાવની ॥ ૮૧૧॥

મન્દાકિની મદાનન્દા મન્દભાગ્યબહિષ્કરા ।
મનશ્શાન્તિપ્રદા ગઙ્ગા મનોમન્દિરદૈવિકા ॥ ૮૧૨॥

મહત્પ્રત્યૂષનિધ્યાતા મહચ્છાન્તિપ્રણાદિની ।
મહત્પ્રત્યૂષકસ્નાનધ્યાનગાનવરપ્રદા ॥ ૮૧૩॥

મહદ્દૂરપ્રવાહા ચ મનોનિકટસંસ્થિતા ।
મનોવાગર્ચિતા માતા મનોમણ્ડલપાવની ॥ ૮૧૪॥

મનઆવૃત્તિરોધા ચ મનઆકાશપૂરણી ।
મનોમૌનપ્રસત્તિશ્ચ મનોહૈમપ્રવાહિણી ॥ ૮૧૫॥

મનોમન્ત્રધ્વનિર્ગઙ્ગા મનોમન્ત્રસ્વરૂપિણી ।
મનોનાદલયા ગઙ્ગા મનસ્સુસ્વરદેવતા ॥ ૮૧૬॥

મનસ્સાક્ષાત્કૃતા ગઙ્ગા મનઃપ્રત્યક્ષદેવતા ।
મનોઽનુભવવાગર્થા મનઐકાગ્ર્યદાયિની ॥ ૮૧૭॥

મનઆકાશગઙ્ગામા મનોગોમુખધાંષિણી ।
મનોગઙ્ગોત્તરીલાસ્યા મનઆલયપાવની ॥ ૮૧૮॥

મનઆકાશગાઙ્ગાભા મનોનાદઝરાસરા ।
મનઃપ્રસાદના ગઙ્ગા પ્રસાદિતમનસ્સ્ફુરા ॥ ૮૧૯॥

મનસ્કકુભસદ્ધારા મનોજવાક્સ્વરૂપિણી ।
મનોજસ્તુતમન્માતા મનોવાક્સ્થિરગામિની ॥ ૮૨૦॥

મનઃસ્ફૂર્તિસ્તુતા ગઙ્ગા મનોમયમદમ્બિકા ।
મનઃપ્રણવનાદા ચ મનઆલીનગઙ્ગિકા ॥ ૮૨૧॥

મનોગોત્રપરીવાહા મનઃપુણ્યસ્થલસ્થિરા ।
મનોરુહપ્રવાહા ચ મનસ્સઙ્ગમસુસ્થલા ॥ ૮૨૨॥

મનસ્સાગરસઙ્ગા ચ મનઃપારપ્રશંસિતા ।

મનોગભીરનિધ્યાતા મનોમિશ્રિતમાવરા ॥ ૮૨૩॥

મનોગુહાવહા ગઙ્ગા મનોરઙ્ગસ્ફુરત્સ્મિતા ।
મનોધીરબહુસ્નાતા મનશ્શાન્તિલયાલયા ॥ ૮૨૪॥

મનઃપ્રશાન્ત્યુષોભાસા મનસ્સન્ધ્યાપ્રસાન્ત્વિની ।
મનસ્સારમયા ગઙ્ગા મનઆનન્દવાહિની ॥ ૮૨૫॥

મનઃપુષ્પાસનાસન્ના મનઃપુષ્પાસવાસુધા ।
મનઃપુષ્પાર્ચિતા ગઙ્ગા મનઃપુષ્પાલયસ્મિતા ॥ ૮૨૬॥

મનઃપુષ્પાતિમોદા ચ મન્મનોમણ્ડલાલયા ।
મનઃપુષ્પાર્ચનપ્રીતા મનઃપુષ્પાભિવર્ષિતા ॥ ૮૨૭॥

મનસ્સન્દર્શિતા ગઙ્ગા મનોમૌનનિનાદિની ।
મનસ્સઙ્કુલ્પિતા માતા મનોલયસુખાવની ॥ ૮૨૮॥

મનોરાગા મનોગાના મદારામા મનોજગા ।
મદાસક્તિસ્તુતા ગઙ્ગા મુદાશક્તિપ્રદાયિની ॥ ૮૨૯॥

માનસારાધિતા ગઙ્ગા માનસપ્રવહાનદા ।
માનસાસારવાગ્વર્ષા માનસારામરામકા ॥ ૮૩૦॥

માનસાદર્શબિમ્બા ચ માહેન્દ્રીમાયુમઙ્કુરા ।
માનસોલ્લાસલાસા ચ માનસાભાસસદ્રસા ॥ ૮૩૧॥

મિત્રોદયપ્રભાસા ચ મિથ્યાતથ્યપ્રબોધિની ।
મિત્રોદયપરિપ્લાવ્યા મિહિકામયપાવના ॥ ૮૩૨॥

મુમુક્ષુશ્રાયસત્તીર્થા મુક્તિસદ્ગતિસમ્પ્રદા ।
મુનિસજ્જનસન્નૂતા મુનિવાક્ચિત્તગામિની ॥ ૮૩૩॥

મૂકવાક્સંસ્તુતા ગઙ્ગા મૂકવાક્સમ્પ્રદાયિની ।
મૂલાધારસ્થિતા દેવી મૂલાધારપ્રણાદિની ॥ ૮૩૪॥

મૃદુસુસ્વરસઙ્ગીતા મૃદુસઙ્ગીતસુસ્વરા ।
મૃદુસ્પર્શાતિહર્ષા ચ મૃદુલસ્વરમોદિની ॥ ૮૩૫॥

મેઘશ્યામતલાભાસા મેઘગામ્ભીર્યનાદિની ।
મેઘદીપસ્ફુરદ્ભાસા મેધાવિલાસવર્ધિની ॥ ૮૩૬॥

મૈત્રાવરુણસન્નૂતા મોક્ષસન્માર્ગગામિકા ।
મૌક્તિકાવલિકલ્લોલા મૌનમાનસવાસના ॥ ૮૩૭॥

મૌનધ્યાનનુતા ગઙ્ગા મૌનહિમ્યાચલાનદા ।
મૌનધ્યાનમનોગેયા મૌનીકૃતમનોનદા ॥ ૮૩૮॥

મૌનાધારશ્રુતિર્ગઙ્ગા મૌનાત્મલયવાહિની ।
મૌનહૈમનદાસારા મૌનનાદઘનાઘના ॥ ૮૩૯॥

યતમાનસસમ્પૂજ્યા યતિશ્રેષ્ઠનુતાપરા ।
યાતસજ્જનકાલુષ્યા યાત્રાસમ્પરિપૂરણી ॥ ૮૪૦॥

યાગઙ્ગા યાનલાવણ્યા યુક્તમાનસસાલયા ।
યેષ્ઠપેયૂષવાક્સ્રાવા યોગિનીવાગ્લયાલયા ॥ ૮૪૧॥

યોગસારનદાસારા યોગસઙ્ગીતગાલયા ।
યોગની યોગતત્ત્વાર્થા યોગિની યોગિનીલયા ॥ ૮૪૨॥

રસસઙ્ગીતવાગ્ધારા રસસઙ્ગતિવાગ્ગતિઃ ।
રસવાગ્રસસંવાહા રસિકા રસિકાવની ॥ ૮૪૩॥

રાગાચલસુવાગ્ધારા રાગવાક્સત્સ્વરૂપિણી ।
રાગાદ્રિરસકૂટસ્થા રાગગઙ્ગા સુરાગિણી ॥ ૮૪૪॥

રિક્થધર્માર્થમોક્ષા ચ રિપ્રવાહપ્રવાહિણી ।
રીતિરાગાતિરાગા ચ રીણવાગ્ધારવાહિની ॥ ૮૪૫॥

રુક્મસ્ફુરા રુચા ગઙ્ગા રુચિસ્ફૂર્તિપ્રવાહિણી ।
રુજાકરરુજા માતા રુદ્રમૂર્ધન્યશીતલા ॥ ૮૪૬॥

રૂપસદ્ગુણવૈશેષ્યા રૂઢાનુરાગપૂજિતા ।
રેખારૂપ્યસુરીતિશ્ચ રૈવતાચલપુત્રિકા ॥ ૮૪૭॥

રોચિઃપૂરા મનોરોચા રોધોવતી ચ રોગહા ।
રોમાઞ્ચનકરાપ્લાવા રૌદ્રાદિરિપુસૂદની ॥ ૮૪૮॥

લવણાલવણાપ્લાવા લલત્તરઙ્ગરઙ્ગભા ।
લક્ષ્યનીરવનીરા ચ લયાવહલયાવહા ॥ ૮૪૯॥

લાલિતાહ્લાદિતાસ્નાતા લાઘવશ્લોકલાઞ્ચિતા ।
લાલસાપરિપૂર્ણા ચ લાઘવાપ્લાવલાઞ્ચિતા ॥ ૮૫૦॥

લિપ્યતીતપ્રભાવા ચ લિખિતશ્લોકદેવતા ।
લીનમાનસસઁલ્લીના લીલાકલ્લોલપૂરિતા ॥ ૮૫૧॥

લુટિતોપલસંવાહા લુલિતાર્તિપ્રશામની ।
લુલિતોલ્લોલસૌમ્યા ચ લૂનભાવસુમાર્ચિતા ॥ ૮૫૨॥

લેખનાતીતસૌરૂપા લેખાક્ષરસ્વરૂપિણી ।
લેખ્યા લેખ્યપ્રવાહા ચ લેશ્યાલાસમનોહરી ॥ ૮૫૩॥

લોકત્રાણાગતા ગઙ્ગા લોક્યા મા લોકપાવની ।
લૌકિકાતીતભાવા ચ લૌકિકાતીતસૌખ્યદા ॥ ૮૫૪॥

વનારામા વનોધામ્ની વનિની વનિનીપ્રિયા ।
વપ્રહૈમાચલા ગઙ્ગા વરિષ્ઠા વસુમાતૃકા ॥ ૮૫૫॥

વાક્સમ્પત્તિપ્રસાદા ચ વાક્સ્વપ્રસાદભાસિની ।
વાક્પુષ્પાર્ચિતવાગ્દેવી વાગ્દીપાવલિલાસિની ॥ ૮૫૬॥

વાગ્વર્ષારાધિતા ગઙ્ગા વાગ્વર્ષવર્ણલાસિકા ।
વાક્સૌષ્ઠવાવહા દેવી વાક્સમ્પ્રીણિતવત્સલા ॥ ૮૫૭॥

વાગર્થભાવપુષ્ટિશ્ચ વાગ્ભાવભાવભાવિતા ।
વાઙ્મણ્ડલાવૃતા ગઙ્ગા વાઙ્મયી વાક્સુજીવની ॥ ૮૫૮॥

વાનપ્રસ્થાશ્રિતા ગઙ્ગા વાસનાપરિધાવની ।
વાગપર્યાપ્તવાહા ચ વાક્પર્યાપ્તપ્રવાહિણી ॥ ૮૫૯॥

વિક્ષેપક્ષાલના ગઙ્ગા વિતીર્ણભવકાનના ।
વિદ્રાવિતાઘસઙ્ઘાતા વિસ્તીર્ણવારિવારિધિઃ ॥ ૮૬૦॥

વીચિપ્લવનવીચિશ્ચ વીતિપ્રવાહવીતિકા ।
વીતરાગમનોરાગા વીણારાગલયાલયા ॥ ૮૬૧॥

વૃન્દારકસમાશ્રાયા વૃન્દારગણવન્દિતા ।
વૃન્દારગણસંત્રાત્રી વૃન્દારિકા હિમાઙ્ગણા ॥ ૮૬૨॥

વેદવેદાન્તસત્સારા વેદસન્નુતસન્નુતા ।
વેદવેદ્યસુસજ્જ્ઞાના વેદાન્તગોચરાલયા ॥ ૮૬૩॥

વૈચિન્ત્યાપોહના ગઙ્ગા વૈચિત્ર્યચિત્રરૂપિણી ।

વૈકાલિકપ્રશાન્તાભા વૈકલ્યાઢ્યનુતિસ્તુતા ॥ ૮૬૪॥

વ્યક્તપૂર્ણત્વરૂપા ચ વ્યાપ્તશ્લોકસહસ્રભા ।
વ્યોમગઙ્ગા સ્તવાસારા વ્યાસક્તાલોકનસ્ફુરા ॥ ૮૬૫॥

શતભાસ્કરભાસા ચ શતેન્દુકરશીકરી ।
શતમેઘધનુર્વર્ણા શતકોટિતડિત્પ્રભા ॥ ૮૬૬॥

શતાનના શતસ્તોમા શતરાગસુમાલિકા ।
શતશ્લોકરયા ગઙ્ગા શતરત્નનિભસ્ફુરા ॥ ૮૬૭॥

શતરાગસુસઙ્ગીતા શતિશ્લોકસુરાગિણી ।
શતનામપ્રભાવા મા શતરાગવિલાસિની ॥ ૮૬૮॥

શતશ્લોકસુરાગા ચ શતરાગકૃતિસ્ફુરા ।
શતકોટિનમસ્કારા શતાયુર્મઙ્ગલપ્રદા ॥ ૮૬૯॥

શતકોટિનુતિસ્તુત્યા શક્તિદા સ્વશચીસ્તુતા ।
શમ્ભુશેખરમાલા ચ શક્તિસ્વરૂપિણી સરિત્ ॥ ૮૭૦॥

શક્તિતેજાસ્પદા ગઙ્ગા શક્તિકૂટનિવાસિની ।
શક્તિજ્ઞાનતપોવર્ધા શક્તિત્રયવિલાસિની ॥ ૮૭૧॥

શાતકુમ્ભનિભાભાસા શાન્તમાનસસન્નુતા ।
શારીરોર્જાવહા ગઙ્ગા શાશ્વતીયસુખાવહા ॥ ૮૭૨॥

શિવા શિવશિરોવાહા શિવરૂપા શિવાવહા ।
શિવાવાહશિવા ગઙ્ગા શિવારાધનશંવરા ॥ ૮૭૩॥

શીઘ્રગા શીતબા ગઙ્ગા શીતાંશુસ્ફુરદઙ્કુરા ।
શીઘ્રિયપ્રવહાદિવ્યા શીલિતાશીતનિમ્નગા ॥ ૮૭૪॥

શુક્તિકલ્લોલશુક્રા ચ શુભાઙ્કિતશુચિપ્લવા ।
શુચિસ્સ્ફૂર્તિશ્શુભસ્પર્શા શૂન્યમાનસપૂરણી ॥ ૮૭૫॥

શૂન્યતાપોહના ગઙ્ગા શૃઙ્ગોત્તુઙ્ગહિમાપગા ।
શેખરાહૈમવાહા ચ શૈલેન્દ્રહિમ્યસત્સ્રવા ॥ ૮૭૬॥

શોકાર્તિભયસંત્રાણા શોધિતાશ્રિતમાનસા ।
શોભનસ્વરસઙ્ગીતા શોભિની સ્વરરૂપિણી ॥ ૮૭૭॥

શ્યુતામૃતપ્રવાહા ચ શ્યામકૃષ્ણપદોદકા ।
શ્યામાભાસતલશ્યામા શ્યામાયુક્તપ્રયાગભા ॥ ૮૭૮॥

શ્રદ્ધાન્વિતાશ્રયા ગઙ્ગા શ્રન્થિતાશ્રિતકર્મજા ।
શ્રન્થિતશ્લોકપુષ્પાલીસ્રજિષ્ઠા ચારુરૂપિણી ॥ ૮૭૯॥

શ્રાન્તસંવાહનાતુલ્યા શ્રાવણશ્રુતિસૌખ્યદા ।
શ્રિતાનન્દાવહા ગઙ્ગા શ્રિતસંરક્ષણાવની ॥ ૮૮૦॥

શ્રીચક્રવાસિની દેવી શ્રીમાતા શ્રીપ્રદાયિની ।
શ્રીચક્રસ્તુતવાગીશી શ્રીમન્ત્રસત્સ્વરૂપિણી ॥ ૮૮૧॥

શ્રીષોડશાક્ષરીવિદ્યા શ્રીરૂપાનેકરૂપિણી ।
શ્રીકરી શ્રીધરી શ્રીલા શ્રીશસાનન્દવાક્સ્થિતા ॥ ૮૮૨॥

શ્રુત્યોંકારસ્વરાનન્દા શ્રુતનામપ્રહર્ષિણી ।
શ્રુતિતાલપ્રવાહા ચ શ્રુતિશુદ્ધસ્તુતિપ્રિયા ॥ ૮૮૩॥

શ્રેયસ્કરી સુખશ્રૈષ્ઠ્યા શ્રોત્રસૌખ્યસુગાલયા ।
શ્રૌત્રપેયૂષસન્નામ્ની શ્લક્ષ્ણશ્લાધ્યપ્રવાહિણી ॥ ૮૮૪॥

શ્લોક્યા શ્લોકગતિશ્લોક્યા શ્લોકિતાગીતવૈભવા ।
શ્લોકસારાંશસેવ્યા મા શ્લોકસત્સારવાહિની ॥ ૮૮૫॥

શ્વાસાહરપુનાના ચ શ્વાન્તનિશ્ચલમાનસા ।
શ્વેતાદ્રિસુપ્રભાના ચ શ્વેતમુત્યસ્મિતાનના ॥ ૮૮૬॥

શ્વેતકૂહાવૃતા ગઙ્ગા શ્વેતવસ્ત્રપ્રભાસિની ।
શ્વેતમુત્યપ્રવાહા ચ શ્વેતમાનસવાસિની ॥ ૮૮૭॥

શ્વેતાચલમનોવાહા શ્વેતાચલસુદર્શના ।
શ્વેતપુષ્પાર્ચિતા ગઙ્ગા શ્વેતસૌમાનસાર્ચિતા ॥ ૮૮૮॥

ષડ્જાધારશ્રુતિર્ગઙ્ગા ષાડવૌડવરાગિણી ।
ષોડશીસારસદ્ધારા ષોડશીમન્ત્રરૂપિણી ॥ ૮૮૯॥

સઙ્ગીતોપાસિતા ગઙ્ગા સઙ્ગીતવાદ્યમોદિની ।
સઙ્ગીતાગીતસાનન્દા સઙ્ગીતવાક્સ્વરૂપિણી ॥ ૮૯૦॥

સત્સઙ્ગા સત્યસઙ્ગા ચ સત્યતથ્યસ્વરૂપિણી ।
સદ્રઙ્ગા મત્પ્રસઙ્ગા મા સત્સુનિષ્ઠાપ્રવર્ધિની ॥ ૮૯૧॥

સંસારતારિણી ગઙ્ગા સંસારજાલદારિણી ।
સંસારઘોરકાન્તારભયઘ્ની સહચારિણી ॥ ૮૯૨॥

સદામાનસસંવાસા સદાનન્દસ્વરૂપિણી ।
સદાશિવમયી ગઙ્ગા સદાત્માનુભવાનુતા ॥ ૮૯૩॥

સદાચલા ચિરા ગઙ્ગા સદાચલમનોઽચલા ।
સદાપૂર્ણા મનઃપૂર્ણા સદાત્માનન્દપૂર્ણતા ॥ ૮૯૪॥

સદાનાદલયાવાહા સદાન્તઃશુભનાદિની ।
સદાત્મલયસંવાહા સદાન્તર્લયસંવહા ॥ ૮૯૫॥

સાંસિદ્ધિકસ્તુતિશ્લોકા સાગરોપાન્તસંસ્તુતા ।
સાહિત્યસ્વરસઁલ્લીના સાત્ત્વિકી સાધુમાનસા ॥ ૮૯૬॥

સિતાંશુસ્મિતપીયૂષા સિતાચલસિતપ્રભા ।
સિતશૈલસુકૌમારી સિન્દૂરપૂજિતાજિતા ॥ ૮૯૭॥

સીતાપૂજિતપૂર્ણા ચ સીતારામપદાપ્લવા ।
સીતારામસુગેયશ્રીત્યાગબ્રહ્મકૃતિસ્રવા ॥ ૮૯૮॥

સુન્દરી સુપ્રદા ગઙ્ગા સુવ્રતાપૂજિતાનુતા ।
સુસ્વાગતસુનામ્ની મા સુસ્વરામોદસારતા ॥ ૮૯૯॥

સુખાસ્પદસુરાપ્લાવા સુનાદપ્રણવાસવા ।
સુમાઙ્ગલ્યપ્રદા ગઙ્ગા સુનાદપ્રશમાવહા ॥ ૯૦૦॥

સુધાસારસુગાસારા સુમાધુર્યપ્રવાહિણી ।
સુવાસિનીવરાધાત્રી સુવાસિતહિમાલયા ॥ ૯૦૧॥

સૂક્તશ્લોકસ્તુતા ગઙ્ગા સૂક્ષ્મરૂપમનશ્ચરા ।
સૂક્ષ્મમાનસપુષ્પાર્ચા સૂક્ષ્મભાવમનસ્સ્મૃતા ॥ ૯૦૨॥

સૂર્યોદયાગ્રનિધ્યાતા સૂર્યોદયમૃદુન્નકા ।
સૂર્યોદયશુભસ્નાતા સૂર્યોદયસુગાલયા ॥ ૯૦૩॥

સૂર્યતાપાપહસ્નાના સૂર્યાસ્તપ્રશમાલયા ।
સૂર્યરશ્મિસ્ફુરદ્ભાસા સૂર્યાસ્તબહુરાગિણી ॥ ૯૦૪॥

સૂર્યાર્ચિઃકલધૌતાભા સૂર્યભાતિસ્ફુરદ્રસા ।

સૂર્યાસ્તાગ્રલસચ્છાયા સુર્યાસ્તનીલહૈમભા ॥ ૯૦૫ ॥

સૃપ્રોદયલસદ્ગાઙ્ગા સૃત્વરી વરમાતૃકા ।
સેવ્યા મા સેવિકારામા સેવિતશ્લોકસેવિતા ॥ ૯૦૬ ॥

સૈકતીનિશ્ચલાવાહા સૈકતપ્રશમાસ્પદા ।
સૈકતાધ્યાતશાન્તિશ્ચ સૈકતીતલમઙ્કુરા ॥ ૯૦૭ ॥

સોહંસ્વભાવનિધ્યાતા સોહંસાત્મલયાવહા ।
સોહંભાવલયાગીતા સોહંનાદપ્રવાહિણી ॥ ૯૦૮ ॥

સૌમઙ્ગલાવહા ગઙ્ગા સૌભાગ્યદૈવતાપરા ।
સૌમ્યા સૌમ્યગુણા ગઙ્ગા સૌમેરુકી પરામ્બિકા ॥ ૯૦૯ ॥

સ્તુતિસ્તોમા સ્તુતિસ્ફૂર્તિઃ સ્તુત્યતીતદ્યુતિસ્ફુરા ।
સ્થલપુણ્યાતિમાહાત્મ્યા સ્ફુટશ્લોકસુમાર્ચિતા ॥ ૯૧૦ ॥

સ્થિરભક્તિચિરાવાસા સ્થિરવિશ્વાસવન્દિતા ।
સ્થિરચિત્તસ્થિરા ગઙ્ગા સ્થિરસત્સુખમાર્ગિણી ॥ ૯૧૧ ॥

સ્નાનપાનાતિપુણ્યાર્ણસ્સ્વસ્તિહસ્તતરઙ્ગિણી ।
સ્વાશ્લિષ્ટસ્નાનમગ્ના મા સ્વાદિષ્ઠહેમહર્ષિણી ॥ ૯૧૨ ॥

સ્વર્ગઙ્ગા સ્વરગઙ્ગા ચ સ્રોતસ્સન્નાદસારતા ।
સ્વાદુસઙ્ગીતસાહિત્યા સ્વાદુસ્વરફલપ્રદા ॥ ૯૧૩ ॥

સ્વશ્લોકિતસ્વમાહાત્મ્યા સ્વાદુસપ્તસ્વરાલયા ।
સ્વશ્લોકસ્વીકરી માતા સ્વામિની સ્વસ્તિવાચિકા ॥ ૯૧૪ ॥

હંસા હંસલયાવાહા હંસગુહ્યપ્રબોધિની ।
હરિનામરસાપ્લાવા હરિશઙ્કરદર્શિની ॥ ૯૧૫ ॥

હસિતોલ્લોલસંહર્ષા હાટકાદ્રિપ્રવાહિણી ।
હારિતાસક્તહાર્દા ચ હારિણી કવિહારિણી ॥ ૯૧૬ ॥

હિમસંહતિસમ્ભાવા હિમોત્સઙ્ગપ્રવાહિણી ।
હિમપ્રવાહપુણ્યાર્ણા હિમાલયનભોનદી ॥ ૯૧૭ ॥

હિમક્ષ્માધરધારા ચ હિમપાષાણપૂરિતા ।
હિમશીતલશીતાપા હિમશ્રન્થપ્રવાહિણી ॥ ૯૧૮ ॥

હિતામ્બુપ્રવહા હિમ્યા હિતોપદેશમાતૃકા ।
હિમાલયસ્થલા દિવ્યા હિમાલયકુમારિકા ॥ ૯૧૯॥

હિમાગમાલિકા ગઙ્ગા હિલ્લોલરાગપૂરિતા ।
હિમગા હિમગાશ્લોકા હિમશાન્તિસુગાપ્લવા ॥ ૯૨૦॥

હિમ્યાચલાક્ષરા ગઙ્ગા હિમાક્ષરવિભૂષિતા ।
હિમપુષ્પાવલીવાસા હિમરશ્મિસ્ફુરદ્રસા ॥ ૯૨૧॥

હીરોર્મિમાલિકા ગઙ્ગા હીરોલ્લોલવિલાસિની ।
હીરા હીરસ્ફુરા માતા હીરભાસ્વદ્વિધુદ્યુતિઃ ॥ ૯૨૨॥

હૂતમાતા ચ હૃદ્યા મા હૃદ્ગતા હૃન્નિવાસિની ।
હૃદન્તરઙ્ગસદ્ધારા હૃદન્તરઙ્ગદેવતા ॥ ૯૨૩॥

હૃદ્ગ્રન્થિભેદના ગઙ્ગા હૃદ્દૌર્બલ્યાપહારિણી ।
હૃદન્તઃસ્ફોટશ્લોકસ્થા હૃત્સ્થસુસ્વરદેવતા ॥ ૯૨૪॥

હૃદ્ગભીરસુસઙ્ગીતા હૃદ્ગભીરસુનાદિની ।
હૃન્નાદપ્રણવાકારા હૃદ્યસદ્ગુરુરૂપિણી ॥ ૯૨૫॥

હૃન્મન્ત્રબોધના ગઙ્ગા હૃન્મન્ત્રસત્સ્વરૂપિણી ।
હૃન્મન્ત્રોંકારનાદા ચ હૃત્પ્રત્યક્ષપરામ્બિકા ॥ ૯૨૬॥

હૃષ્ટિકારહિમાપ્લાવા હૃષ્ટરોમહિમાપ્લુતા ।
હૃષ્ટિસ્ફુટસ્તુતિશ્લોકા હૃષ્ટિગાશ્લોકસાલયા ॥ ૯૨૭॥

હેમાદ્રિસુપ્રભાવા ચ હેમસ્નાનપ્રમોદિની ।
હેમાચલતડિલ્લેખા હેમકૂટપ્રભાસિની ॥ ૯૨૮॥

હૈમા હૈમવતી ગઙ્ગા હૈમની હૈમશેખરી ।
હૈમસાનુનુતાગીતા હૈમમેરુવિકાસિની ॥ ૯૨૯॥

હ્રીંકારનિલયા માતા હ્લાદિતૈકાન્તપૂજિકા ।
હ્લાદુકોંકારનાદા ચ હ્લાદિતાક્ષરમાલિકા ॥ ૯૩૦॥

અક્ષરશ્લોકમાલાભા અક્ષરાદ્યન્તપૂજિતા ।
વર્ણપુષ્પાવલીમોદા માતૃકાસ્તુતમાતૃકા ॥ ૯૩૧॥

શ્રીગઙ્ગામાનસપૂજા ॥

માનસારાધિતા ગઙ્ગા માનસાગીતમાતૃકા ।
મનોમન્ત્રાક્ષરા માતા મનોમેરુરસાલયા ॥ ૯૩૨ ॥

હૃત્પીઠસંસ્થિતા માતા હૃન્મેરુસન્નિવાસિની ।
હૃત્સ્ફૂર્તિમન્ત્રબીજામ્બા હૃન્નાદસંવિકાસિની ॥ ૯૩૩ ॥

હ્રીંકારમન્ત્રરૂપા મા હ્રીંકારમન્ત્રપૂજિતા ।
હ્રીંકારમન્ત્રસત્સારા મન્ત્રોપદેશિની સુની ॥ ૯૩૪ ॥

શ્રીવિદ્યાસત્ત્વરૂપા મા હૈમકૂટવિલાસિની ।
મન્ત્રશક્તિપ્રવાહા ચ મહાપર્વતલાસિની ॥ ૯૩૫ ॥

ષોડશસ્તુતવાગ્દેવી શ્રીવિદ્યા ષોડશાક્ષરી ।
ષોડશીજપવર્ણા ચ મહામેરુનિવાસિની ॥ ૯૩૬ ॥

રસમેરુવિકાસામ્બા રસમેરુસુપૂજિતા ।
રસાનન્દસ્વરૂપા મા રસારસરસારસા ॥ ૯૩૭ ॥

રસવાક્પ્રદમાગઙ્ગા રસવર્જરસાપહા ।
રસરાગલસદ્રાસા અતિરાગા વિરાગિણી ॥ ૯૩૮ ॥

ગુરુવન્દનસઙ્ગીતા ગુર્વાશીર્વચઆનુતા ।
ગુરુસઙ્ગીતસદ્ધારા ગુરુકીર્તનસઁલ્લયા ॥ ૯૩૯ ॥

નાદબિન્દુકલાપૂર્ણા નાદોપાસનસન્નુતા ।
નાદસદ્ગુરુસદ્રૂપા નાદોંકારરસાલયા ॥ ૯૪૦ ॥

નાદવિદ્યાર્થિસઙ્ગીતા નાદોપાસિતસુસ્વરા ।
નાદહૃલ્લાલસાપૂર્ણા નાદાર્થિહૃલ્લસત્પ્રભા ॥ ૯૪૧ ॥

બ્રાહ્મમુહૂર્તસુસ્નાતા ધ્યાતા ગીતસુમાર્ચિતા ।
ગઙ્ગા સમ્પૂજિતા માતા મદાત્માનન્દદેવતા ॥ ૯૪૨ ॥

સર્વાનન્દમયી દેવી સર્વાનન્દલયસ્થિતા ।
સર્વાનન્દસુખાવાહા સર્વાનન્દસુખાવહા ॥ ૯૪૩ ॥

સરસ્વતી મહાલક્ષ્મી પાર્વતી ભદ્રરૂપિણી ।
દેવી ગઙ્ગા મદમ્બા શ્રીઃ પૂજામન્દિરદૈવિકા ॥ ૯૪૪ ॥

અત્યૂષધ્યાનસુસ્નાના ધ્યાનપ્રશાન્તિગાલયા ।
વીણાનાદસ્વરામોદા વીણાગાનસ્થરાગિણી ॥ ૯૪૫ ॥

વીણાગાનલયા ગઙ્ગા તુમ્બરશ્રુતિવાહિની ।
નાદાજસ્રપ્રવાહા મા અન્તઃપ્રશાન્તિવર્ધિની ॥ ૯૪૬॥

તુમ્બરસ્વરસઙ્ગીતા એકધારપ્રવાહિણી ।
એકનાદૌઘવાહા મા ભક્તિસઙ્ગીતવાક્સ્ફુરા ॥ ૯૪૭॥

એકોંકારગસુશ્રાવ્યા એકસઙ્ગીતસુસ્રવા ।
એકશબ્દાતિમાધુર્યા એકપ્રશાન્તિવાહિની ॥ ૯૪૮॥

ઓંકારનાદસદ્ધારા લયરાગાર્ચિતાનુતા ।
લયલીનસુગાધારા નાદપ્રવાહરૂપિણી ॥ ૯૪૯॥

શ્રુતિરાગસુસઙ્ગીતા ઓંકારશ્રુતિતુમ્બરા ।
કૃતિસારપ્રવાહા ચ નામગાનસુધાવહા ॥ ૯૫૦॥

સ્તુતિસાહિત્યસંવેગા સ્તુતિશ્રુતિનિનાદિની ।
સ્તુતિરીતિસુકીર્તિશ્ચ સ્તુતિદ્યુતિવિલાસિની ॥ ૯૫૧॥

સ્તુતિસ્તોમસુસઙ્કીર્તિઃ સ્તુતિસ્તોત્રીસુગાયિકા ।
સ્તુત્યતીતાતિસત્કીર્તિઃ સ્તુતિરીતિસુવાગ્વહા ॥ ૯૫૨॥

ગાતવ્યા ગીતરાગા ચ શ્રોતવ્યોંકારનાદિની ।
જ્ઞાતવ્યતત્ત્વવાગર્થા શ્લોકવાગર્થરૂપિણી ॥ ૯૫૩॥

ગાયત્રી ગાયસંત્રાત્રી ગાયવાક્સ્થિરગામિની ।
ગાનાધારપ્રશાન્તિશ્ચ ગાયાધારપ્રવાહિણી ॥ ૯૫૪॥

ગીતાધારસ્વરોંકારા ગીતધારાપ્રસાન્ત્વિની ।
ગીતાચાર્યનદીરૂપા ગીતાનન્દપ્રસાદિની ॥ ૯૫૫॥

સદ્ગુર્વદ્ભુતસઙ્ગીતા ગુરુગાનલયાવહા ।
ગુરુદેવોક્તિસત્ત્વોદા પાવિત્ર્યનામગાનગા ॥ ૯૫૬॥

દિવ્યસન્નામસઙ્ગીતા દિવ્યાનુભવમોદિની ।
દિવ્યસત્સ્ફૂર્તિસાધ્યા મા સ્ફૂર્તિશ્લોકિતરાગિણી ॥ ૯૫૭॥

સત્સાહિત્યમૃદૂદા ચ સઙ્ગીતાતિમૃદુસ્વરા ।
રામાનન્દસુરીતિશ્ચ ગુરુસઙ્કીર્તનાવહા ॥ ૯૫૮॥

સઙ્ગીતસઙ્ગતિક્રીડા સઙ્ગીતસત્તરઙ્ગિણી ।

સઙ્ગીતાગીતસમ્મોદા સઙ્ગીતસદ્ગતિપ્રદા ॥ ૯૫૯॥

સઙ્ગીતસ્તુતિગામ્ભીર્યા સાહિત્યવાગ્વિલાસિની ।
રાગગઙ્ગા રભોદા મા માનસાનન્દગાયિની ॥ ૯૬૦॥

ગેયમાના સુગેયા મા તોયરાગલયાલયા ।
તોયજાહ્લાદસઙ્ગીતા ત્યાગરાજસુવાગ્લયા ॥ ૯૬૧॥

ગુરુસાહિત્યપાવિત્ર્યા ગીતાનન્દકદમ્બકા ।
કૃતિરાગસુલાસ્યા ચ દિવ્યનામશુભોદકા ॥ ૯૬૨॥

સત્સુખાવહસઙ્ગીતા મત્સુખાવહમાતૃકા ।
સઙ્ગીતસત્સુખાવાહા મજ્જલ્પશ્લોકગીતિકા ॥ ૯૬૩॥

આત્માનુભૂતિસાહિત્યા સ્વાનુભૂતિપ્રસાદિકા ।
સ્વાનુભૂતિસ્તુતાગીતા સ્વાનુભૂતમદમ્બિકા ॥ ૯૬૪॥

સાન્ત્વસ્વરાવરા ગઙ્ગા શાન્તસૌખ્યપ્રદાયિની ।
સામગાનપ્રિયા દેવી નામગાનપ્રસાદિની ॥ ૯૬૫॥

ગઙ્ગા ગમ્ભીરગાયા ચ ગાયગામ્ભીર્યગામિની ।
મનોગભીરગેયા મા ગભીરનાદસાન્ત્વિની ॥ ૯૬૬॥

સઙ્ગીતાગીતમાધુર્યા વાણીમાધુર્યવાક્સ્થિતા ।
સઙ્ગીતારામસાનન્દા વાણીમાધુર્યવાસિતા ॥ ૯૬૭॥

સુસ્વરામોદસંવાસા સુસ્વરા સુસ્વરાર્ચિતા ।
સુસ્વરાન્તઃપ્રશાન્તિશ્ચ સુસ્વરાનન્દસંવરા ॥ ૯૬૮॥

સૌવર્ણાર્ચિતસૌવર્ણા કવિતાભાતિશોભના ।
છવિલાસસ્તુતિસ્યૂમા કવિસત્કૃતિવન્દિતા ॥ ૯૬૯॥

રાગાલાસ્યસુરાગા ચ તાલવિશ્રામગામિની ।
વિશ્રામરામગાયસ્થા સદાશિવમુદામયી ॥ ૯૭૦॥

સત્સઙ્ગીતનુતિપ્રીતા રાગપુષ્પાસવોદકા ।
રાગમાધુર્યવાક્સારા રાગપુષ્પાસુપૂજિતા ॥ ૯૭૧॥

ગાનસન્નુતિરાગા ચ સત્કીર્તનસ્વરાલયા ।
મનસ્સ્વચ્છલયારાગા ગઙ્ગા ગમ્ભીરગાયની ॥ ૯૭૨॥

સુધાગાનસુમાધુર્યા સુધામયી સુવાઙ્મયી ।
સ્તુતિસ્તોમસ્વરાગીતા સ્તુતિસઙ્ગીતરાગિણી ॥ ૯૭૩॥

નુતિગીતસ્તુતા માતા સુનાદસ્વરપૂજિતા ।
રાગવાક્સુસ્વરા ગઙ્ગા નાદસત્સારવાહિની ॥ ૯૭૪॥

નાદાકૃતિનદીસ્વર્ગ્યા નાદસુધારસાપ્લવા ।
ત્યાગબ્રહ્મસુવાગ્ધારા ત્યાગગઙ્ગાપરાપ્લવા ॥ ૯૭૫॥

સુરા સુમાનસારાધ્યા સુધાપાનકમાધુરી ।
સુરાનન્દા સ્વરાનન્દા સ્વરવિદ્યાપરીવહા ॥ ૯૭૬॥

વરાનન્દસ્વરાનન્દા વરસપ્તસ્વરાલયા ।
વરવીણાસ્વરાલીના સ્વરમાલાસુશોભિતા ॥ ૯૭૭॥

વરરાગરસાસારા વરસત્કીર્તનાવહા ।
સ્વરરાગલયાહ્લાદા સ્વરસપ્તકશોભના ॥ ૯૭૮॥

લયરાગસુધાપ્લાવા લયલીનવરપ્રદા ।
લાસરાગસમુલ્લાસા ગાગઙ્ગાત્મલયાવહા ॥ ૯૭૯॥

રાગસ્થિરકરા ગઙ્ગા રાગાસ્થિરકરાવની ।
સ્થિરરાગમનોરાગા રાગાન્તા રાગલાલિની ॥ ૯૮૦॥

રાગાનુરાગરાગા ચ રાગરાગસુરાગગા ।
રાગાતિરાગસઙ્ગીતા રાગતાલલયાલયા ॥ ૯૮૧॥

રાગોપાસનસમ્પ્રીતા રાગલાસસુલાસિની ।
રાગાનુરાગસંવર્ધા રાગતાલસુવાસિની ॥ ૯૮૨॥

રાગઘ્ની રાગિણી ગઙ્ગા રાગાનન્દપ્રવાહિણી ।
રાગાનુરાગસંયોગા લયરાગતરઙ્ગિણી ॥ ૯૮૩॥

રાગા રાગાઙ્કિતા ગઙ્ગા રાગભા રાગસુસ્મિતા ।
રાગાઙ્કિતમનોવાહા રાગદા રાગસંસ્થિતા ॥ ૯૮૪॥

રાગવિદ્યાર્થિસઙ્ગીતા રાગસ્વરઘનાઘના ।
રાગાનુરાગરાગા ચ લયરાગવરપ્રદા ॥ ૯૮૫॥

રાગરાગસુરાગા મા રાગરાસલયસ્મિતા ।
રાગલાસ્યલયાવાહા રાગતાલતરઙ્ગભા ॥ ૯૮૬॥

રાગાનુરાગરઙ્ગા ચ રાગરાગસુરઙ્ગિણી ।
રાગૌઘવાહરાગૌઘા વાણીગામ્ભીર્યરાગિણી ॥ ૯૮૭ ॥

રાગસઁલ્લીનસઙ્ગીતા રાગરીતિપ્રવાહિણી ।
રાગસઙ્ગીતસત્સારા રાગસારપ્રણાદિની ॥ ૯૮૮ ॥

રાગસારસ્વરાસારા સારાનન્દશુભોદકા ।
સારનામનદાપ્લાવા નાદસારપ્રવાહિણી ॥ ૯૮૯ ॥

દેવકુલ્યા ધરાવાહા રાગિણી રાગમાલિકા ।
દિવ્યનાદલસદ્રાગા રાગાલયાલયાસ્પદા ॥ ૯૯૦ ॥

વાગપર્યાપ્તમાહાત્મ્યા સુલભાવર્ષવાગ્વરા ।
વાગ્રાગાતીતમાધુર્યા વાગ્રાગલયસદ્રસા ॥ ૯૯૧ ॥

સરાગશ્લોકિતા માતા સુરાગમયવાહિની ।
વિરાગમનઆવાહા અરાગત્વપ્રદાયિની ॥ ૯૯૨ ॥

ગઙ્ગા સતતસમ્પૂર્ણા સમ્પૂર્ણરાગરૂપિણી ।
સમ્પૂર્ણજ્ઞાનદાત્રી મા સમ્પૂર્ણશ્લોકમણ્ડલા ॥ ૯૯૩ ॥

સત્યવાક્સ્થિતસત્યા મા સત્યવાક્પૂર્ણવાહિની ।
વાક્સત્યપરિપૂર્ણા ચ વાગ્વર્ણપરિવાહિણી ॥ ૯૯૪ ॥

નુતિનામસહસ્રાભા નામપુષ્પાલયસ્તુતા ।
પુષ્પાસવસુસઙ્ગીતા ગઙ્ગા કલમૃદુસ્વરા ॥ ૯૯૫ ॥

પુષ્પાત્માનન્દસઙ્ગીતા પુષ્કલા જ્ઞાનપુષ્કલા ।
સુસ્વરામોદવાક્પુષ્પા સુલભાનન્દસિદ્ધિદા ॥ ૯૯૬ ॥

માનસાહ્લાદવાહા મા માનસા માનસપ્રિયા ।
ગાનગઙ્ગા રયાવેગા નામવાગ્ધારવાહિની ॥ ૯૯૭ ॥

શ્રીપઞ્ચનદનાદાર્કત્યાગબ્રહ્મકૃતિસ્ફુરા ।
શિષ્યાપુષ્પાસુરાગેણ પ્રાતઃસન્ધ્યાસુપૂજિતા ॥ ૯૯૮ ॥

શિશુજલ્પનિભસ્તોત્રપુષ્પાવલિસુમણ્ડિતા ।
બાલાલાપસ્તુતિસ્તોમા બાલાલાપપ્રમોદિતા ॥ ૯૯૯ ॥

માગઙ્ગા સુપ્રસન્ના ચ બાલાલાપસ્તુતિસ્ફુરા ।

પર્યન્તવાક્સ્તુતા ગઙ્ગા અપર્યન્તાદ્ભુતાલયા ॥ ૧૦૦૦॥

સહસ્રશ્લોકગાયસ્થા અતિરાગસુમાર્ચિતા ।
અજસ્રધારસચ્છ્લોકા અશુષ્કપ્રચુરાવહા ॥ ૧૦૦૧॥

સહસ્રશ્લોકિતા ગઙ્ગા સહસ્રાયુતમાહિના ।
સહસ્રાયુતપાપઘ્ની સહસ્રાયુતનામભા ॥ ૧૦૦૨॥

સહસ્રશ્લોકસઙ્ગીતા શ્લોકામોદાતિમોદિની ।
સહસ્રાયુતનામાર્ચા સહસ્રભાસુરા સુરા ॥ ૧૦૦૩॥

મનસ્સઙ્કલ્પહેતુશ્ચ મનસ્સઙ્કલ્પપૂરણી ।
સહસ્રશ્લોકસંસ્ફૂર્તિઃ સહસ્રશ્લોકમાલિની ॥ ૧૦૦૪॥

ગઙ્ગાશ્લોકસહસ્રસ્થા ભાવજસ્તોત્રમાલિકા ।
ન કાપિ સ્તુતિરત્યુક્તિર્ગઙ્ગાપરમદેવતા ॥ ૧૦૦૫॥

સ્તુત્યામોદા સ્વરામોદા ભક્ત્યામોદા મદમ્બિકા ।
પુષ્પામોદા તદ્દ્વારા મોક્ષસૌભાગ્યદાયિકા ॥ ૧૦૦૬॥

નિત્યશ્લોકનુતાગીતા નિત્યમઙ્ગલગઙ્ગિકા ।
નિત્યસ્નાનાતિપુણ્યા મા નિત્યવૈભવમઙ્ગલા ॥ ૧૦૦૭॥

સર્વમઙ્ગલસંયુક્તા સર્વમઙ્ગલદાયિની ।
સર્વા સુમઙ્ગલા દેવી માગઙ્ગા સર્વમઙ્ગલા ॥ ૧૦૦૮॥

ગઙ્ગાતીરસ્ફુટસ્તોત્રં ગઙ્ગાસ્તવસહસ્રકમ્ ।
અપર્યાપ્તં સ્તુતિસ્તોમં પર્યાપ્તશુભમઙ્ગલમ્ ॥

ગઙ્ગાદેવીપરાશક્તિસ્ફૂર્તિશ્લોકસહસ્રકમ્ ।
પુષ્પાગીતં ગુરુપ્રીતં ગઙ્ગાર્પણં સુમઙ્ગલમ્ ॥

ગઙ્ગાપુત્રીગુરુસ્તોત્રીપુષ્પવલ્લીસુલેખની ।
સ્વયંગઙ્ગાકૃતં સ્તોત્રં ભગભવ્યસુમઙ્ગલમ્ ॥

ૐ

શુભમસ્તુ

# શ્રીગઙ્ગાસહસ્રમ્

## શ્રીગઙ્ગારાગપુષ્પાવલી

શ્રીઃ

ૐ સદ્ગુરુશ્રીત્યાગરાજસ્વામિને નમો નમઃ ।

રાગદેવ્યૈ ચ વિદ્મહે । સુરાગિણ્યૈ ચ ધીમહિ ।
તન્નો ગઙ્ગા પ્રચોદયાત્ ॥

રાગાતિદેવતા ગઙ્ગા રાગવાક્સ્ફુટમાતૃકા ।
રાગમાનસસઞ્ચારા રાગતાલલયાવહા ॥ ૧॥

રાગસ્વરલયા ગઙ્ગા રાગમન્દિરદૈવિકા ।
રાગતાલસ્તુતા માતા રાગાતિરાગવન્દિતા ॥ ૨॥

રાગરાગસુમારાધ્યા રાગાનુરાગસંસ્તુતા ।
રાગાનુરાગવેગા ચ રાગપુષ્પાવલિસ્મિતા ॥ ૩॥

રાગવાક્સ્તુતમાગઙ્ગા રાગચ્છવિલસત્પ્રભા ।
નાનારાગલસદ્રાગા રાગપ્રપઞ્ચસચ્છવિઃ ॥ ૪॥

રાગહૈમાદ્રિરાગા ચ રાગાચલરસાપ્લવા ।
રાગસાગરરાગા ચ રાગસુધારસાયના ॥ ૫॥

પાનરઞ્જનભોગ્યા ચ યાગયોગફલાવહા ।
ત્યાગબ્રહ્મનુતાગીતનાદોંકારસ્વરાલયા ॥ ૬॥

સદાશિવમયી ગઙ્ગા જીવન્મુક્તવિદુસ્તુતા ।
હિમાદ્યાન્દોલિકા ગઙ્ગા હિમરાગસુધારસા ॥ ૭॥

મયૂરકણ્ઠસૌવર્ણા ધ્વનિરાગસુધારસા ।
સપ્તસ્વરસુરઙ્ગા ચ શોભનસ્વરસપ્તકા ॥ ૮॥

વરરાગલયા ગઙ્ગા વરદા વરદપ્રિયા ।

સ્વરસારરસાપ્લાવા સુરમાનવપૂજિતા ॥ ૯॥

શઙ્કરાભરણા ગઙ્ગા સ્વરરાગસુધારસા ।
સ્વર્ગાપવર્ગસિદ્ધિશ્ચ પરમાનન્દમોક્ષદા ॥ ૧૦॥

મૂલાધારજનાદા ચ મૃદુતાલગતિસ્રવા ।
કોલાહલસ્વરાસારા સપ્તસ્વરરસાસરા ॥ ૧૧॥

રજતાદ્રિલયારાગા નગજા નાદયોગિની ।
સ્વરાર્ણવગભીરા ચ સહજજ્ઞાનભક્તિદા ॥ ૧૨॥

હિમહિન્દોલના ગઙ્ગા હિન્દોલોલ્લોલલાસિની ।
હિમમોહનનાટા ચ હિમગઙ્ગાતરઙ્ગિણી ॥ ૧૩॥

કામ્ભોજચરણાપ્લાવા હરિકામ્ભોજપાદભા ।
હિમગોત્રજટાજૂટભૈરવાનટભૈરવી ॥ ૧૪॥

આનન્દભૈરવી ગઙ્ગા તોડીરાગતરઙ્ગભા ।
ધન્યાસીરાગરાગા ચ ગૌરી ખરહરપ્રિયા ॥ ૧૫॥

ભૌલીરાગોષકાગીતા કલ્યાણી સ્વરભૂષણી ।
ગમ્ભીરવાણિસન્નાદા કુસુમાકરસેચિતા ॥ ૧૬॥

સુધાતરઙ્ગિણી ગઙ્ગા ભૂષાવલિસુમદ્યુતિઃ ।
મનોબિલહરિધ્યાનગાનવારિધિસઙ્ગમા ॥ ૧૭॥

મોહનાલાસ્યરાગા ચ મોહનદ્યુતિશોભના ।
મોહનસ્વરમાધુર્યા મોહનાવર્ણમાલિકા ॥ ૧૮॥

ફેનદ્યુતિરભોજૂર્ણિઃ ફણિશાયિપદદ્યુતિઃ ।
ઝઙ્કારધ્વનિગમ્ભીરા ગમ્ભીરનાટલાસિની ॥ ૧૯॥

નટનારાયણી ગઙ્ગા રઞ્જની શિવરઞ્જની ।
મન્મનોરઞ્જની માતા શ્રીરઞ્જની નિરઞ્જની ॥ ૨૦॥

દીપકારતિશોભા ચ સુરતિઃશ્રુતિરઞ્જની ।
દીપકાન્તિમતી ગઙ્ગા સુરુચિશ્ચિત્તરઞ્જની ॥ ૨૧॥

સૂર્યકાન્તદ્યુતિસ્મેરા ધૌતપઞ્ચમરઞ્જની ।
છાયાતરઙ્ગિણી ગઙ્ગા શ્રીમતી જનરઞ્જની ॥ ૨૨॥

ઉમાભરણહૈમાભા માલવી સ્વરરઞ્જની ।
કમાસ્ફોટસુકાવ્યા ચ કામાદિમારરઞ્જની ॥ ૨૩॥

વલજુષ્યવરાનન્દા વરગાયકરઞ્જની ।
વરુણપ્રિયગાનન્દા વનોરસિકરઞ્જની ॥ ૨૪॥

સુધામ્બોધિસુરાપ્લાવા ભાગ્યશ્રીઃ સ્મરરઞ્જની ।
જીવસઞ્જીવની ગઙ્ગા સુધાલહરિજીવની ॥ ૨૫॥

આરભીશ્રિતમન્દારી અભીષ્ટવરમઞ્જરી ।
હરિકેદારગોલા ચ સુજ્ઞાનફલમઞ્જરી ॥ ૨૬॥

સુરાગમઞ્જરી ગઙ્ગા મધુરસ્વરવર્ધની ।
ત્યાગયાગપ્રિયા ગઙ્ગા રાગાનુરાગવર્ધની ॥ ૨૭॥

નાદવિનોદિની ગઙ્ગા નાદિનીધાતુવર્ધની ।
નાટકપ્રિયસન્નૂતા હરિણી હાટકામબરી ॥ ૨૮॥

ષણ્મુખપ્રિયમાતા ચ ઋષભપ્રિયમોદિની ।
રુદ્રપ્રિયા મુખારી ચ નરદેવમનોહરી ॥ ૨૯॥

જયન્તશ્રીવિલાસા ચ ગઙ્ગા ગાઙ્ગેયભૂષણી ।
ઝઞ્જૂતિપ્રવહા ગઙ્ગા ચન્દ્રજ્યોતિર્મનોહરી ॥ ૩૦॥

સમ્પૂર્ણલલિતારાગા અઠાણાતીવ્રવાહિની ।
પાટિતાજ્ઞાનબન્ધા ચ રસાલી રસિકપ્રિયા ॥ ૩૧॥

હંસધ્વનિસુનાદા ચ હંસનાદપ્રસાન્ત્વિની ।
નાદચિન્તામણિર્ગઙ્ગા આનન્દામૃતવર્ષિણી ॥ ૩૨॥

સારા સારમતી ગઙ્ગા માર્ગદેશીયસૌભગા ।
સારઙ્ગસ્વરસઙ્ગીતા કોકિલારવસૈકતા ॥ ૩૩॥

વિજયશ્રીવરાનન્દા બલહંસા સુકેસરી ।
જયનારાયણી ગઙ્ગા મનોમલહરીશ્વરી ॥ ૩૪॥

ત્વરાનલિનકાન્તિશ્ચ વસન્તભૈરવીચ્છવિઃ ।
વરાલીલલિતારાધ્યા વાચસ્પતિનુતાવરા ॥ ૩૫॥

સૌરાષ્ટ્રદેવતા ગઙ્ગા નારાયણી ગુરુપ્રિયા ।
શુદ્ધભઙ્ગાલકાનન્દા હંસાનન્દિયતિસ્તુતા ॥ ૩૬॥

ભદ્રાનન્દાલકાનન્દા નરસિંહેન્દ્રમધ્યમા ।
મલ્લારમ્યસ્મિતોલ્લોલા બદરીતુઙ્ગનાગગા ॥ ૩૭॥

ઓંકારી સુચરિત્રા મા ભાગીરથી સુગોમુખી ।
નાદસ્વરૂપિણી ગઙ્ગા ચારુનાદતરઙ્ગિણી ॥ ૩૮॥

દેવીસિંહારવા ગઙ્ગા સ્વસૃસાલકભૈરવી ।
સદારામકલિસ્નાના ચલનાટકુરઞ્જિતા ॥ ૩૯॥

ગૌરીવેલાવલી પૂર્વી દેવક્રિયા રઘુપ્રિયા ।
દેવગાન્ધારિણી ગઙ્ગા સ્તવરાજકૃતિસ્થિરા ॥ ૪૦॥

તીરજઙ્ગલઝઙ્કારભ્રમરીરવપૂરિતા ।
તારદિવ્યમણિચ્છાયાનાટત્વિડ્બિન્દુમાલિની ॥ ૪૧॥

નવરત્નવિલાસા ચ નભોમણિવિભાત્વિષા ।
મણિરઙ્ગવિભૂષા ચ કિરણાવલિમણ્ડિતા ॥ ૪૨॥

કલાનિધિલસોલ્લાસા શ્રીમાધવમનોહરી ।
માર્ગહિન્દોલવેલા ચ શ્રીમણિઃકન્નટદ્યુતિઃ ॥ ૪૩॥

જ્યોતિર્જ્ઞાનપ્રદીપા મા આત્મજ્ઞાનપ્રવર્ધની ।
જ્યોતિસ્સ્વરૂપિણી માતા આત્મજ્યોતિઃપ્રદર્શિની ॥ ૪૪॥

શૈલદેશાક્ષિતા ગઙ્ગા દેવી મલયમારુતા ।
રીતિગોલાતિરાગા ચ ગૌલરાગકૃતિસ્તુતા ॥ ૪૫॥

નાદવરાઙ્ગિણી ગઙ્ગા ઊર્મિકાચારુકેશિની ।
નાદનામક્રિયાયોગા વનસ્પતિપદોદકા ॥ ૪૬॥

ધેનુકાશ્લોકપૂજ્યામ્બા નાયકી વરદાયકી ।
ધર્મવતી દ્વિજાવન્તી નવનીતસ્વરાવલી ॥ ૪૭॥

ગઙ્ગા હેમવતી સામા નાગાભરણહિમ્યકા ।
ભવાની ચલનાટા ચ ગઙ્ગા જયમનોહરી ॥ ૪૮॥

કાચકન્નટગોલાભા કીરવાણીસુખસ્વરા ।
કેદારસુપ્રદીપા ચ કોકિલધ્વનિપારગા ॥ ૪૯॥

જગન્મોહનકલ્યાણી સરસ્વતીમનોહરી ।

શુદ્ધસીમન્તિની ગઙ્ગા આભોગિકનકાઙ્ગિની ॥ ૫૦॥

ગમનાશ્રમવાહા ચ શુક્લભાપૂર્ણચન્દ્રિકા ।
ચક્રવાકસુમાલા ચ ગઙ્ગા અમૃતવાહિની ॥ ૫૧॥

ગુર્ઝરીપ્રવહા ગઙ્ગા કુકર્મબહુદારિણી ।
સત્કામવર્ધની ગઙ્ગા સત્સુજ્ઞાનવિવર્ધની ॥ ૫૨॥

સુપ્રતાપવરાલીના સિદ્ધસેનાતરઙ્ગિણી ।
હંસભ્રમરિકાવેલા બૃન્દાવની કલાવતી ॥ ૫૩॥

હંસસેનાવતી ગઙ્ગા ચન્દ્રશ્રીરાગવાહિની ।
હંસગીર્વાણિમાધુર્યા ચિન્મયાનન્દવાહિની ॥ ૫૪॥

હરિનારાયણી ધાત્રી શુદ્ધદેશીયખાપગા ।
કાશીરામક્રિયા ગઙ્ગા નામદેશી રવિક્રિયા ॥ ૫૫॥

સંયુક્તયમુનાકલ્યાણીગઙ્ગામહિમાસ્પદા ।
પ્રસ્થાનસાગરા ગઙ્ગા સૈન્ધવી સિન્ધુભૈરવી ॥ ૫૬॥

સદ્ધ્યાનતત્પરસ્ફૂર્તિર્ગઙ્ગા ષડ્વિધમાર્ગિણી ।
સિન્ધુરામક્રિયાયોગા બઙ્ગાલદેશસિન્ધુગા ॥ ૫૭॥

ભદ્રશ્રીઃસુરસિન્ધુશ્ચ સરિત્સિન્ધુતરઙ્ગિણી ।
નાગરીનાગવલ્લીગઙ્ગાભૂપાલતરઙ્ગિણી ॥ ૫૮॥

વેદઘોષપ્રિયા ગઙ્ગા વેદવલ્લી ભુજઙ્ગિણી ।
નાદપ્રિયગવામ્ભોધિસઁલ્લયોંકારઘોષિણી ॥ ૫૯॥

માનિની દેવગીર્વાણી પાલિની સુપ્રવાહિણી ।
ગઙ્ગા હમીરકલ્યાણી રાગદિવ્યતરઙ્ગિણી ॥ ૬૦॥

ગઙ્ગા મન્દાકિની સ્વર્ગ્યા અધોભોગવતીસરી ।
સુરાગકેસરી ગઙ્ગા ભદ્રા ભુવનમોહિની ॥ ૬૧॥

સન્ધ્યારતિપ્રિયાગીતા ગીતપ્રિયા સુપોષિણી ।
ભઙ્ગાલાસ્યમુદાસારા કોલાહલજલાર્ણવા ॥ ૬૨॥

શ્રીયદુકુલકામ્ભોજવદનામુક્તગીતિકા ।
સહાના માલવશ્રીશ્ચ માયામાલવગોલકા ॥ ૬૩॥

સાવેરી શુદ્ધસાવેરી અસાવેરી લતાઙ્ગિની ।
નામનારાયણી શૌભા જીવન્તિની શુભાઙ્ગિની ॥ ૬૪॥

નાગસ્વરાવલીભૂષા રાગરૂપવતી લયા ।
રાગપઞ્જરગુપ્તા ચ કાન્તામણિસુપૂજિતા ॥ ૬૫॥

નાગગાન્ધારિણી ગઙ્ગા નામગાનાગનન્દિની ।
સુપુન્નાગવરાલીગા ભૈરવી સિંહવાહિની ॥ ૬૬॥

રમામનોહરી રામા શ્રીકમલામનોહરી ।
શુભપન્થુવરાલીના ગઙ્ગા ઈશમનોહરી ॥ ૬૭॥

મુકુન્તલવરાલી ચ મુકુન્દપ્રિયરાગિણી ।
મૂકવાગ્રાગરાગામ્બા મૂકવાગ્રાગવર્ધની ॥ ૬૮॥

આહિરી કલકણ્ઠી ચ કલ્ગડશ્યામલાઙ્ગિની ।
આપોજયન્તસેનાર્કા સ્વર્ણાઙ્ગિચતુરઙ્ગિણી ॥ ૬૯॥

સરસ્વતીસુવાણી ચ કવિતાવેગવાહિની ।
ગાકોકિલવરાલી ચ ગૌલીપન્થુશ્ચ જિઙ્ગલા ॥ ૭૦॥

રાગચૂડામણિર્ગઙ્ગા દેવામૃતકવર્ષિણી ।
રામપ્રિયાપ્રિયારામા ચિન્તામણિશ્ચ શૂલિની ॥ ૭૧॥

માઞ્જિજ્ઞોષકહૈમાગ્રા ભૂપાલરાગસન્નુતા ।
પૂર્ણષડ્જાદિરાગા ચ સઙ્ગીતસ્વરસાર્ચિતા ॥ ૭૨॥

રત્નાઙ્ગિતલશોભા ચ રસભારવિચન્દ્રિકા ।
સુવાગધીશ્વરી ગઙ્ગા વાગ્ગદનકુતૂહલા ॥ ૭૩॥

સુહિન્દોલવસન્તાર્કા નટાભરણઝલ્લિકા ।
હુસેનીબેગડારાગગુરુસ્વામિકૃતિસ્મિતા ॥ ૭૪॥

સૌવીરરઘુવીરાતિપ્રશસ્તમહિમાસ્પદા ।
શ્રીકૃષ્ણગોપિકાવસન્તારાસરાસરઙ્ગભા ॥ ૭૫॥

સુકલ્યાણવસન્તશ્રીર્વસન્તોત્સવવૈભવા ।
આભેરીદુન્દુભીઢક્કાઘણ્ટારવસુપૂજિતા ॥ ૭૬॥

વીરવસન્તકાસારા ગઙ્ગા માલવપઞ્ચમા ।
પૂર્વપઞ્ચમસઙ્ગીતપૂરપારશરાવતી ॥ ૭૭॥

કોકિલપ્રિયસઙ્ગીતપ્રિયગાગાયકપ્રિયા ।
ગીતનીતિમતી માતા સઙ્ગીતતાનરૂપિણી ॥ ૭૮॥

ચિત્રામ્બરી વસન્તાભા ગ્રીષ્મગૌરીમનોહરી ।
શરદ્ભાનુમતી ગઙ્ગા વર્ષાભામેઘરઞ્જની ॥ ૭૯॥

હેમનીલામ્બરી હૈમા સન્ધ્યાભાકનકામ્બરી ।
જગન્મોહનરાગા ચ છાયાગૌરી ચ ભાર્ગવી ॥ ૮૦॥

છાયા છાયાવતી ગઙ્ગા ભોગચ્છાયાનટાપગા ।
સુપુષ્પલતિકાચ્છાયા છાયાગોલસુપલ્લવા ॥ ૮૧॥

શુદ્ધવેલાવલી ગઙ્ગા મુક્તામ્બરી હિમાઙ્ગિની ।
સુરાગચન્દ્રિકાકાન્તી રસરાગમનોહરી ॥ ૮૨॥

પૂર્ણપઞ્ચમકલ્લોલા ધવલા ધવલામ્બરી ।
શ્યામચિન્તામણિર્ગઙ્ગા શતરાગવિનોદિની ॥ ૮૩॥

સુકાનડહહાલાસ્યા પઞ્ચમાનવભાસુરા ।
સારઙ્ગનાટસઙ્ગીતા ઇન્દુસારઙ્ગનાટકા ॥ ૮૪॥

ગાનાગપઞ્ચમાસારા ગાનપ્રિયા સુભાષિણી ।
સુલાવણ્યવતી ગઙ્ગા હંસદીપકશોભિની ॥ ૮૫॥

જ્ઞાનસ્વરૂપિણી ગઙ્ગા છાયાનારાયણી સરિત્ ।
કૂલંકષસ્રવન્તી ચ વરધર્મપ્રકાશિની ॥ ૮૬॥

કોસલાપતિસન્નૂતા સ્તુતિમેધા સ્તુતિપ્રિયા ।
હિમદેવમુખારી ચ રઙ્ગલીલાતરઙ્ગિણી ॥ ૮૭॥

રાગસાલગનીયા મા મહતી તાપસપ્રિયા ।
સ્તુતિજાલવરાલીશ્રીર્ગૌડમલ્લારતિસ્તુતિઃ ॥ ૮૮॥

વિશ્વમ્ભરી જુજાહૂલી સરસાઙ્ગીકૃતસ્તુતિઃ ।
વકુલાભરણાન્ધાલી ગરુડધ્વનિસુસૃતિઃ ॥ ૮૯॥

ગઙ્ગા કૈકવશીકર્ત્રી કુરઞ્જિતકુતૂહલા ।
નવરોચશરચ્છાયા ધવલાઙ્ગા ભવપ્રિયા ॥ ૯૦॥

દર્ભારિન્દમપાદોદા દેવરઞ્જિતગુઞ્જરી ।

ગાનનાગધ્વનિર્ગઙ્ગા રેવગુપ્તિપ્રવાહિણી ॥ ૯૧॥

હંસપ્રભાવલીશોભા હંસનારાયણી શુભા ।
હંસનીલામ્બરી ગઙ્ગા રાગહંસગિરીશ્વરી ॥ ૯૨॥

માનવતીર્થિકા ગઙ્ગા ગાનમૂર્તિર્લયાલયા ।
ગાનસામવરાલીના વીણાગાગમકક્રિયા ॥ ૯૩॥

શ્લોકભૂષાવતી ગઙ્ગા સત્કાવ્યરસમઞ્જરી ।
શ્રુતિગાનલયા માતા ગાનસન્તાનમઞ્જરી ॥ ૯૪॥

રાગપુષ્પાવલીસાર્ચા સુરાગશતમાલિકા ।
સઙ્ગીતરાગસામોદા શ્લોકાલીસ્વરદૈવિકા ॥ ૯૫॥

પરન્ધામવતી ગઙ્ગા નિષદશ્લોકમણ્ડલા ।
શ્રીનારાયણગોલાપઃ સૌગન્ધિનીસુમાર્ચિતા ॥ ૯૬॥

સચ્ચિત્સ્વરૂપિણી ગઙ્ગા સત્ત્વસુજ્ઞાનબોધિની ।
આનન્દાનન્તધારા ચ સજ્જ્ઞાનમુક્તિદાયિની ॥ ૯૭॥

કાપિ પૂતતરા નાસ્તિ ગઙ્ગા પરમપાવની ।
ન ચાસ્તિ કાપિ નારાયણીગઙ્ગાતીતમાહિના ॥ ૯૮॥

નાદરૂપિગુરુસ્વામિતારવલ્ગુસ્વરાલયા ।
રાગાનુરાગસામોદપુષ્પાલીનવમાલિકા ॥ ૯૯॥

ત્રિજગન્મોહિની ગઙ્ગા પૂજાકુટીરકુમ્ભિની ।
સુમધ્યમાવતી દેવી ગઙ્ગા મઙ્ગલકૈશિકી ॥ ૧૦૦॥

ત્યાગરાજગુરુસ્વામિગારાગાયૈ સુમઙ્ગલમ્ ।
શિષ્યાપુષ્પાસુરાગેણ સઙ્ગીતાયૈ સુમઙ્ગલમ્ ॥ ૧૦૧॥

સઙ્ગીતશ્રુતિધારાયૈ રાગસ્ફુર્ત્યૈ સુમઙ્ગલમ્ ।
આધારશ્રુતિષડ્જાયૈ ઓંકારિણ્યૈ સુમઙ્ગલમ્ ॥ ૧૦૨॥

ઋષભારૂઢશેખર્યૈ સરીગાયૈ સુમઙ્ગલમ્ ।
રીતિરાગસ્વરાવલ્યૈ ગાગઙ્ગાયૈ સુમઙ્ગલમ્ ॥ ૧૦૩॥

ગાન્ધારપ્લવધારાયૈ ગામાલિન્યૈ સુમઙ્ગલમ્ ।
ગાનવીણાપ્રસારિણ્યૈ મધ્યમાયૈ સુમઙ્ગલમ્ ॥ ૧૦૪॥

પઞ્ચમસ્વરગીતાયૈ ધનિકાયૈ સુમઙ્ગલમ્ ।
નિષાદશ્લોકસર્યૈ ચ સાનન્દાયૈ સુમઙ્ગલમ્ ॥ ૧૦૫॥

રાગરાગસુરાગાયૈ રાગધાત્ર્યૈ સુમઙ્ગલમ્ ।
રાગતાલલયાયૈ ચ રાગદેવ્યૈ સુમઙ્ગલમ્ ॥ ૧૦૬॥

મઙ્ગલં રાગહિમ્યાયૈ રાગગાયૈ સુમઙ્ગલમ્ ।
મઙ્ગલં રાગકંનિધ્યૈ ગઙ્ગાદેવ્યૈ સુમઙ્ગલમ્ ॥ ૧૦૭॥

મઙ્ગલં રાગમાલિન્યૈ રાગિણ્યૈ શુભમઙ્ગલમ્ ।
મઙ્ગલં મોક્ષકારિણ્યૈ ગઙ્ગાદેવ્યૈ સુમઙ્ગલમ્ ॥ ૧૦૮॥

ૐ

શુભમસ્તુ

# શ્રીગઙ્ગાસહસ્રમ્

## શ્રીગઙ્ગાપ્રમાણિકાસ્તુતિઃ

શ્રીઃ

ૐ સદ્ગુરુશ્રીત્યાગરાજસ્વામિને નમો નમઃ ।

હિમાલયસ્ય પુત્રિકા હિમાહિમાસરાપ્લવા ।
હિમાતિશુભ્રસારકા હિમાપગા સુગઙ્ગિકા ॥ ૧॥

હિમાલયસ્થદૈવિકા પ્રમાણિતાતિપૂતકા ।
હિમપ્રપાતકાવ્યઝા સુકાવ્યઝાપ્રસાદિકા ॥ ૨॥

રમાપપાદરાસકા ઉમાપશેખરોદકા ।
રમારમારમાપ્લવા ઉમારમાભિરામકા ॥ ૩॥

સનાદસારસારગા નિનાદસુસ્વરાશુગા ।
સુનાદસાર્ચિતાભગા નનાદગાસ્વરાપગા ॥ ૪॥

સરીગમાપધાનિસાસ્વરાર્ચનાતિમોદિતા ।
ગગામમાધનીસરી સ્વરાસરા સુરાપગા ॥ ૫॥

સ્વરાક્ષરા ક્ષરાક્ષરા ક્ષરાક્ષરા સુવાક્ક્ષરા ।
સુભાક્ષરા શુભાક્ષરા સુકાક્ષરા સુખાક્ષરા ॥ ૬॥

સુરાગરાગરાગગા સદાશિવાશિરોદકા ।
સુધાપ્લવાતિમોદકા સુરાપ્લવા શુભોદકા ॥ ૭॥

ભવાભવા ભવપ્રિયા વરપ્રદાભગાપગા ।
સદામુદાકરામ્બિકા સદાર્ચિતા પરામ્બિકા ॥ ૮॥

સરાગગીતમાતૃકા સુરાગપુષ્પમાલિકા ।
વરાગરક્તિલાસ્યકા વિરાગમુક્તિદાયિકા ॥ ૯॥

કુકર્મદારિણીશ્વરી વિમુક્તિદાયિની જની ।

સુવાસિનીસુપૂજિતા સુકૌશલા સુમઙ્ગલા ॥ ૧૦॥

ગુરુપ્રસાદકીર્તિતા ગુરુપ્રમોદગીતિકા ।
ગુરુપ્રચોદનાર્ચિતા ગુરુસ્વયંકૃતાર્ચના ॥ ૧૧॥

સુમઙ્ગલં સુગઙ્ગિકે પ્રમાણિકાસ્તુતિસ્ફુરે ।
સુરાગતાલલાસ્યકે સુવાણિ તે સુમઙ્ગલમ્ ॥ ૧૨॥

ૐ શુભમસ્તુ

# શ્રીગઙ્ગાસહસ્રમ્

## શ્રીગઙ્ગારોગનિવારણસ્તોત્રમ્

શ્રીઃ

ૐ સદ્ગુરુશ્રીત્યાગરાજસ્વામિને નમો નમઃ ।

સર્વરોગહરે ગઙ્ગે સર્વપીડાવિનાશિનિ ।
સર્વંગે કુરુ મે માતા રોગશોકનિવારણમ્ ॥ ૧॥

મદમ્બ બહુતપ્તાહં કુરુ રોગાપસારણમ્ ।
ત્વાં વિના ન ગતિર્માતઃ કુરુ શોકાપહારણમ્ ॥ ૨॥

કર્તવ્યં તવ માતસ્ત્વત્પુત્રીખેદપ્રશામનમ્ ।
શ્રોતવ્યં મમ સન્તાપગદક્લેશપ્રલાપનમ્ ॥ ૩॥

બહુદૂરોસ્મ્યહં માત આમયાધ્યતિતાપિતા ।
અગ્રયાગચ્છ મન્માતઃ પૂરયેયં સુલાલસા ॥ ૪॥

માતર્ગઙ્ગે સમાગચ્છ શીતં તવ સ્પૃશં કુરુ ।
વસમત્સદને માતર્દેહિ મે તવ દર્શનમ્ ॥ ૫॥

વહ મત્પ્રાઙ્ગણે માતર્બહ્વીપ્સિતજલાવરે ।
દેહિ મગ્નં તવૌષધ્યશીતે નિત્યં સ્પૃહાં મમ ॥ ૬॥

માતઃ ક્વ તવ માહાત્મ્યમ્ અસ્મિન્ક્ષણે સુરક્ષ મામ્ ।
કુરુ કર્મનિવૃત્તિં મે ન કર્તવ્યં વિલમ્બનમ્ ॥ ૭॥

શબ્દરાક્ષસપીડાવિનાશનં કુરુ શાશ્વતમ્ ।
શબ્દાસુરગણં ભઙ્ગ્ધિ ભઙ્ગ્ધિ મચ્છત્રુમણ્ડલમ્ ॥ ૮॥

નમો ગઙ્ગે મદમ્બ ત્વં ત્રાહિ માં ભવપીડિતામ્ ।
કુરુ સ્વસ્ત્યયનં ગઙ્ગે કુરુ શીઘ્રવિમોચનમ્ ॥ ૯॥

આરોગ્યં કુરુ મે દેવિ નિરામયં પ્રયચ્છ મે ।

માતર્ગઙ્ગે નમસ્તુભ્યં ત્વત્પારવસનં કુરુ ॥ ૧૦॥

પ્રત્યક્ષં કુરુ મે દેવિ મદન્તઃસતતાલયે ।
કુતોન્યત્ર ગમિષ્યામિ બ્રૂહિ ત્વં ભવતારિણિ ॥ ૧૧॥

ત્વત્પરં નાસ્તિ મે કિઞ્ચિત્ કુરુ જન્મનિવારણમ્ ।
ત્વયિ સ્નાનં તવ ધ્યાનમિદં જન્મ તવાર્પણમ્ ॥ ૧૨॥

ગઙ્ગાતીરસુવાસં ચ ગાયત્રીસારમઙ્ગલમ્ ।
ગીતાં ગુરુપ્રસાદં ચ ગોવિન્દં પ્રાપ્નવાન્યહમ્ ॥

ૐ શુભમસ્તુ

# શ્રીગઙ્ગાસહસ્રમ્

## ખગઙ્ગાભુજઙ્ગપ્રયાતમ્

શ્રીઃ

ૐ સદ્ગુરુશ્રીત્યાગરાજસ્વામિને નમો નમઃ ।

ભુજઙ્ગપ્રયાતોર્મિવાહપ્રવાહાં
ભુજઙ્ગપ્રશાન્તપ્રસાદપ્રસારામ્ ।
ભુજઙ્ગાધરાજસ્રધારાભિષેકાં
ભજે સ્વર્ગગઙ્ગાં સુવર્ગાપવર્ગામ્ ॥ ૧॥

સદાદર્શનાસ્ફોટકાવ્યાભિનવ્યાં
સ્વસૌન્દર્યસંસ્ફૂર્તિશૈલીગભીરામ્ ।
સતાલસ્વરોંકારસાનન્દલાસ્યાં ભજે
નાદગઙ્ગાં સ્વરામોદદર્શામ્ ॥ ૨॥

ખગઙ્ગાં ગગઙ્ગાં મુમુક્ષુત્વધેયાં
વરસ્નાનસત્પાનસજ્જ્ઞાનબોધામ્ ।
જલાપૂતપુણ્યાં મહાપૂતનામ્નીં
ભજે રાગગઙ્ગાં લયાવેગવાહામ્ ॥ ૩॥

વરાનન્દકન્દાં સ્વરાનન્દસારાં
ચિદાનન્દસદ્ભાં ચિરાનન્દગાઙ્ગામ્ ।
મદાનન્દગેયાં સદાનન્દગેહાં
ભજે જ્ઞાનગઙ્ગામનન્તાદિશક્તિમ્ ॥ ૪॥

હિમાંશુપ્રભાસપ્રવાહપ્રહર્ષાં
સુરૌપ્યાતિશોભામ્બુશુભ્રપ્રવાહામ્ ।
હિમાગપ્રભાવાતિસત્ત્વપ્રકાશાં
ભજે સત્યગઙ્ગાં પરબ્રહ્મકાશામ્ ॥ ૫॥

હિમાહ્લાદગઙ્ગાં નમામ્યાપવર્ગાં
ક્ષપાનાથસંસ્મેરચારુસ્વરૂપામ્ ।
સલાલિત્યવૈચિત્ર્યચિત્રાભિલેખાં
ભજે હિમ્યગઙ્ગાં મનશ્શાન્તિસૌખ્યામ્ ॥ ૬॥

સુકાવ્યાર્પણાનન્દસમ્પ્રાપ્તિભવ્યાં
સુમાઙ્ગલ્યસદ્ભાગ્યસમ્પત્તિભોગ્યામ્ ।
સુગાનપ્રસન્નાં હૃદબ્જે નિષણ્ણાં
ભજે દિવ્યગઙ્ગાં મદાનુગ્રહામ્બામ્ ॥ ૭॥

ગુરુત્યાગરજેન્દ્રસઙ્ગીતગઙ્ગાં
સુપુષ્પાભિષેકપ્રમોદપ્રસાદામ્ ।
ઇહાનન્દભદ્રાં પરજ્ઞાનમોક્ષાં
ભજે નિત્યગઙ્ગાં વરાં મઙ્ગલાભામ્ ॥ ૮॥

ખગઙ્ગે ભુજઙ્ગપ્રયાતે સુભદ્રં
કવિપ્રાણસંસ્ફૂર્તિપૂતે સુભદ્રમ્ ।
સુરાગસ્ફુરદ્રાગયાતે સુભદ્રં
સુભદ્રં સુમાઙ્ગલ્યદે તે સુભદ્રમ્ ॥ ૯॥

ૐ શુભમસ્તુ

# શ્રીગઙ્ગાસહસ્રમ્

## શ્રીગઙ્ગામઙ્ગલસ્તોત્રમ્

શ્રીઃ

ૐ સદ્ગુરુશ્રીત્યાગરાજસ્વામિને નમો નમઃ ।

ગોમુખાદૃશ્યપુણ્યાયૈ ગઙ્ગોત્તર્યૈ સુમઙ્ગલમ્ ।
ભગીરથતપસ્યાયૈ ભાગીરથ્યૈ સુમઙ્ગલમ્ ॥ ૧॥

જાહ્નવીશુભનામ્ન્યૈ ચ શુભ્રાયૈ શુભમઙ્ગલમ્ ।
હરિશીલસુશીલાયૈ હિમગાયૈ સુમઙ્ગલમ્ ॥ ૨॥

સૌમ્યકાશ્યુત્તરાયૈ ચ વિશ્વેશ્વર્યૈ સુમઙ્ગલમ્ ।
બિલઙ્ગનાસયુક્તાયૈ ભદ્રાયૈ શુભમઙ્ગલમ્ ॥ ૩॥

દેવપ્રયાગતીર્થાયૈ દેવભૂત્યૈ સુમઙ્ગલમ્ ।
સઙ્ગતાલકનન્દાયૈ ગઙ્ગાદેવ્યૈ સુમઙ્ગલમ્ ॥ ૪॥

અલકાપુરિનન્દાયૈ સ્વર્ણદ્યૈ શુભમઙ્ગલમ્ ।
વસુધારાઝરીસર્યૈ સરસ્વત્યૈ સુમઙ્ગલમ્ ॥ ૫॥

બદરીધામભાસિન્યૈ નારાયણ્યૈ સુમઙ્ગલમ્ ।
સુવર્ણાલકનન્દાયૈ વિષ્ણુપદ્યૈ સુમઙ્ગલમ્ ॥ ૬॥

લક્ષ્મણાયૈ સુધૌલ્યૈ ચ જ્યોતિર્મત્યૈ સુમઙ્ગલમ્ ।
નન્દાકિન્યૈ ચ પિણ્ડાર્યૈ મન્દાકિન્યૈ સુમઙ્ગલમ્ ॥ ૭॥

અલકાનન્દભવ્યાયૈ ભાગીરથ્યૈ સુમઙ્ગલમ્ ।
દેવપ્રયાગસઙ્ગાયૈ ગઙ્ગાદેવ્યૈ સુમઙ્ગલમ્ ॥ ૮॥

લોકોદ્ધારણપાવન્યૈ નિમ્નગાયૈ સુમઙ્ગલમ્ ।
હૃષીકેશાપગાયૈ ચ ગઙ્ગિકાયૈ સુમઙ્ગલમ્ ॥ ૯॥

હરિદ્વારવિલાસિન્યૈ ગિરિણ્યૈ સુમઙ્ગલમ્ ।

દીપકારતિશોભાયૈ ગઙ્ગાકાયૈ સુમઙ્ગલમ્ ॥ ૧૦॥

સમભૂમિપ્રવાહાયૈ પ્રયાગાયૈ સુમઙ્ગલમ્ ।
યમુનાસહયુક્તાયૈ ત્રિવેણ્યૈ શુભમઙ્ગલમ્ ॥ ૧૧॥

અધોયુક્તસરસ્વત્યૈ ગઙ્ગાયૈ શુભમઙ્ગલમ્ ।
સરિદ્વરાસુનામ્ન્યૈ ચ સુરનદ્યૈ સુમઙ્ગલમ્ ॥ ૧૨॥

કાશીક્ષેત્રાતિપુણ્યાયૈ ગઙ્ગાદેવ્યૈ સુમઙ્ગલમ્ ।
વિશાલાક્ષ્યન્નપૂર્ણાયૈ ક્ષેત્રેશિન્યૈ સુમઙ્ગલમ્ ॥ ૧૩॥

સાગરાયણસારાયૈ શૈલજાયૈ સુમઙ્ગલમ્ ।
બઙ્ગભઙ્ગપ્રભૂતાયૈ ગઙ્ગાયૈ શુભમઙ્ગલમ્ ॥ ૧૪॥

સગરાન્વયમોક્ત્ર્યૈ ચ સાગરાયૈ સુમઙ્ગલમ્ ।
ગઙ્ગાસાગરસઙ્ગાયૈ હિમનદ્યૈ સુમઙ્ગલમ્ ॥ ૧૫॥

ગઙ્ગાત્રિપથગાયૈ ચ પૂજ્યાયૈ શુભમઙ્ગલમ્ ।
કલિપ્રત્યક્ષદેવ્યૈ ચ ગઙ્ગામાત્રે સુમઙ્ગલમ્ ॥ ૧૬॥

અક્ષરાગુપ્તમાત્રે ચ આદિદેવ્યૈ સુમઙ્ગલમ્ ।
માનસાલયદિવ્યાયૈ માનિતાયૈ સુમઙ્ગલમ્ ॥ ૧૭॥

શ્રીવિદ્યાશક્તિરૂપાયૈ મન્ત્રશક્ત્યૈ સુમઙ્ગલમ્ ।
કાદિહાદિરસાયૈ ચ રાગિણ્યૈ શુભમઙ્ગલમ્ ॥ ૧૮॥

પ્રમાણિતાતિપૂત્યૈ ચ પદ્યસ્ફૂર્ત્યૈ સુમઙ્ગલમ્ ।
છન્દોવૃત્તસુલાસ્યાયૈ છન્દકાયૈ સુમઙ્ગલમ્ ॥ ૧૯॥

સહસ્રાયુતકીર્ત્યૈ ચ સપ્રીત્યૈ શુભમઙ્ગલમ્ ।
સહસ્રશ્લોકભાત્યૈ ચ ગઙ્ગાદેવ્યૈ સુમઙ્ગલમ્ ॥ ૨૦॥

રોગશોકનિવારિણ્યૈ માગઙ્ગાયૈ સુમઙ્ગલમ્ ।
નિરામયપ્રદાયિન્યૈ નિત્યાયૈ શુભમઙ્ગલમ્ ॥ ૨૧॥

પુષ્પાવર્ષાભિષિક્તાયૈ વાગ્દેવ્યૈ શુભમઙ્ગલમ્ ।
જ્ઞાનમોક્ષપ્રદાયિન્યૈ માગઙ્ગાયૈ સુમઙ્ગલમ્ ॥ ૨૨॥

મઙ્ગલં મઙ્ગલાધાત્ર્યૈ મહાપુણ્યસુવાક્શ્રિયૈ ।
મનઃપાવનનામ્ન્યૈ ચ ગઙ્ગામાત્રે સુમઙ્ગલમ્ ॥ ૨૩॥

મઙ્ગલં તે શુભે ગઙ્ગે મઙ્ગલં માતૃદેવતે ।
મઙ્ગલં મમ સર્વસ્વે મઙ્ગલં મઙ્ગલાયને ॥ ૨૪॥

મઙ્ગલં ત્યાગરાજાય મદાચાર્યવરાય ચ ।
મઙ્ગલં જ્ઞાનગઙ્ગાય મઙ્ગલં મોક્ષસિદ્ધયે ॥

ૐ તત્સદિતિ માતૃગઙ્ગાપ્રેષ્ઠાપુષ્પાનામલેખનીરૂપેણ
સ્વયંગઙ્ગાકૃતં સ્તોત્રં ગઙ્ગાસ્તવસહસ્રકં સમ્પૂર્ણમ્ ।

ૐ

શુભમસ્તુ

Encoded and proofread by N V Vathsan nvvathsan at gmail.com
Copyright Pushpa Srivatsan

*Shri Ganga sahasram*

This text is entirely original composition of Smt. Pushpa Srivatsan, and copyright Smt. Pushpa Srivatsan. All rights reserved by the author. 1) **Under no conditions** can either the whole or any part of this composition be **translated**, **adapted**, or **used for commercial purposes**. 2) Neither the whole nor any part of this composition can be reproduced, recorded, used in public perfomances, or distributed in any other way without **prior written permission** from the copyright holder, the author Smt. Pushpa Srivatsan (contact N V Vathsan nvvathsan@gmail.com).

pdf was typeset on April 20, 2024
Please send corrections to *sanskrit@cheerful.com*